CC-0. In Public Domain. Digitization by eGangotri

३२६ ।

... स्तवा

शक्ति-स्तव-स्तवकम्

त-७।

सम्पादक :-

पं० कामक्षा प्रसाद द्विवेदी,

नव्यव्याकरणाचार्य

नव्यन्यायाचार्य

साहित्याचार्य M. A.

संवत् २०२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री[illegible] गीर्वाण संस्थाध्यक्षाय
[illegible] । प्रदत्त प्रति के [illegible]
[illegible] हरा ॥

कामेश्वरप्रसाद
द्विवेदी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्ति-स्तव-स्तवकम्

३४३१

सम्पादक :-
पं० कामक्षा प्रसाद द्विवेदी,
नव्यव्याकरणाचार्य
नव्यन्यायाचार्य
साहित्याचार्य M. A.

इ. पु.
११५

संवत् २०२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूची-पत्र

	पृष्ट
आद्याराधना—	१
कालीकवचम्—	२
कर्पूरस्तवराजः	७
कालीस्तोत्रम्—	१२
कालीकवचम्—	१६
कालीहृदयम्—	२१
आद्योपनिषद्—	२५
कालीशतनाम —	२८
ककारादि काली सहस्र नाम स्तोत्रम् —	३१
कर्पूरस्तोत्र पाठ के विनियोगादि—	५२
ताराराधना (ताराष्टकम्)—	५३
इच्छापूरिणी स्तोत्रम् (कामाक्षा प्रसाद द्विवेदी कृत)—	५६
श्री बगलाराधना—	५७
१—कवचम्—	५६
२—कवचम—	६१
श्री बगला मुखी स्तोत्रम्—	७०
हृदयम्—	८२
शतनाम—	८६
षोडशीसमर्चा (स्तोत्रम्)—	९३
वाराहीनिग्रहाष्टकम् —	९८
सप्तश्लोकी दुर्गा—	१०२
दुर्गाद्वात्रिंशन्नाममाला—	१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृ		पंक्ति	शुद्ध
२५	....	१३	कर्वगतिः
३५	....	२	कज्जलप्रियसंतुष्टा
३५	....	३	कपालमालाभरणा
३५	....	१६	कक्षगासनसंस्थिता
३५	....	२०	कर्णनासा
३६	....	१	कलहा कलहातुरा
३६	...	१३	कस्तूरीतर्पणोद्यता
४१	....	६	कपिलाराध्यहृदया
४२	....	७	कर्षमात्रसुवर्णदा
४२	....	४	क्रांबीज हृदयाय नमःस्मृता
४५	....	१८	कालागरुप्रतर्पणा
४६	....	४	कुं कुं कुं शब्दनिलया
४६	....	१६	क्रीं क्रीं क्रुँ क्रुँ क्रौं
५०	...	१०	क्रोधज्वाला
५२	....	६	देवतायै नमो हृदि
५२	...	१६	वौषट्
५३	....	१६	निःशङ्कङ्के
५४	....	१८	स्तत्तुल्यान्—स्वबम्
५५	....	८	वाचस्पतिः
५५	....	१०	शुचिः
५६	....	१०	तद्विश्वस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृ०		पंक्ति	शुद्ध
१५	....	७	दारिद्र्यस्य
१५	...	७	क स्थितिः
१५	....	१८	त्व हि लक्ष्मीः शिवा त्वम्
१६	....	६	पुत्रबुद्ध्या
१६	....	८	धार्मिकश्च
१६	....	१५	त्वमेव
१८	....	१	दक्षिणे कालिका
५८	....	१८	क्रीं क्रीं ह्रीं
१९	....	१६	त्रिःसकृद्वापि
२२	....	३	हृदयाय—स्वाहा, क्रूँ शिखायै वषट्
२६	....	६	भवति
२६	....	१५	खड्गमुण्ड
२७	....	१	कौमारी
२७	....	६	ब्रह्मादिपदं
२७	....	१३	वरदत्तं
२९	....	१६	कुम्भस्तनी
२९	...	१६	प्रपठेद्य इदं
३०	....	३	भक्त्या
३१	....	१०	कलाकोटिप्रपूजिता
३३	....	६	मध्यस्था
	....	५	मध्यस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृ०		पक्ति	शुद्ध
३४	....	१३	कविगतिः
३५	....	२	कज्जलप्रियसंतुष्टा
	....	३	कपालमालाभरणा
३८	....	१६	कक्षपासनसंस्थिता
३५	....	२०	कर्णांनासा
३६	....	१	कलहा कलहातुरा
३६	...	१३	कस्तूरीतर्पणोद्यता
४१	....	६	कपिलाराध्यहृदया
४२	....	७	कर्षमात्रसुवर्णदा
४५	....	४	क्रांबीज हृदयाय नमःस्मृता
४५	....	१८	कालागरुप्रतर्पणा
४६	....	४	कुं कुं कुं शब्दनिलया
४६	....	१६	क्रीं क्रीं क्रूँ क्रैं क्रौं
५०	...	१०	क्रोधज्वाला
५२	....	६	देवतायै नमो हृदि
५२	...	१६	वौषट्
५४	....	१६	निःशङ्कमङ्के
५४	....	१८	स्तत्तुल्यान्—स्वयम्
५५	....	८	वाचस्पतिः
५५	....	१०	शुचिः
५६	....	१०	तद्विश्वस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृ०		पंक्ति	शुद्ध
१५	....	७	दारिद्र्यस्य
१५	...	७	क स्थितिः
१५	...	१८	त्वं हि लक्ष्मीः शिवा त्वम्
१६	....	६	पुत्रबुद्ध्या
१६	....	८	धार्मिकश्च
१६	....	१५	त्वमेव
१८	....	१	दक्षिणे कालिका
१८	....	१८	क्रीं क्रीं ह्रीं
१६	....	१६	त्रिःसकृद्वापि
२२	....	३	हृदयाय—स्वाहा, क्रूँ शिखायै वषट्
२६	....	६	भवति
२६	....	१५	खड्गमुण्ड
२७	....	१	कौमारी
२८	....	६	ब्रह्मादिपदं
२७	....	१३	वरदस्तं
२६	....	१६	कुम्भस्तनी
२६	...	१६	प्रपठेद्य इदं
३०	....	३	भक्त्या
३१	....	१०	कलाकोटिप्रपूजिता
३३	....	६	मध्यस्था
३४	....	५	मध्यस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

अद्याराधना

ध्यानम्

(१) शवारूढा महाभीमां घोररूपां हसन्मुखीम् ।
चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम् ॥१॥
मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बराम् ।
एवं सञ्चिन्तयेत् कालीं श्मशानालयवासिनीम ॥२॥
(२) करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाबिभूषिताम् ॥
सद्यः छिन्नशिरः खड्गवामाधोर्ध्वकराम्बुजाम् ।
अभयं वरदञ्चैव दक्षिणोर्ध्वाधपाणिकाम् ॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ।
कण्ठावसक्तमुण्डालीं गलद्रुधिरचर्चिताम् ॥
कर्णावतंसतानीत शवयुग्मभयानकाम् ।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधरीम् ॥
शवानां करसंघातैः कृतकांचीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधारा विस्फुरिताननाम् ॥
घोररावां महारौद्रीं श्मशानालयवासिनीम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालार्कमण्डलाकार लोचनत्रितयान्विताम् ॥
दन्तुरां दक्षिणव्यापि मुक्तालम्बिकचोच्चयाम् ।
शवरूपमहादेवहृदयोपरिसंस्थिताम ।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ।
महाकालेन च समं विपरीतरतातुराम् ॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ।
एवं सञ्चिन्तयेत् कालीं सर्वकामार्थसिद्धिदाम् ॥

मन्त्र :—

क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ।

अथ कालीकवचं प्रारभ्यते ।

कैलासशिखरारूढं शङ्करं वरदं शिवम् ।
देवी प्रपच्छ सर्वज्ञं सर्व देवं महेश्वरम ॥ १ ॥

॥ श्रीदेव्युवाच ॥

भगवन्देवदेवेश देवानां भोगद प्रभो ।
प्रब्रूहि मे महादेव गोप्यमद्यापि यत्प्रभो ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत्रूणां येन नाशः स्यादात्मनो रक्षणं भवेत् ।
परमैश्वर्य्यमतुलं लभद्येन हि तद्वद ॥ ३ ॥

॥ भैरव उवाच ॥

वक्ष्यामि ते महादेवि सर्वधर्मविदां वरे ।
अद्भुतं कवचं देव्याः सर्वकामप्रसाधकम् ॥ ४ ॥
विशेषतः शत्रुनाशं सर्वरक्षाकरं नृणाम् ।
सर्वारिष्टप्रशमनमभिचारविनाशनम् ॥ ५ ॥
सुखदं भोगदं चैव वशीकरणमुत्तमम् ।
शत्रुसंघाः क्षयं यान्ति भवन्ति व्याधिपीडिताः
दुःखिनो ज्वरिणश्चैव स्वानिष्टप्रहतास्तथा ॥ ६ ॥

ॐ अस्य श्रीकालीकवचस्य भैरव ऋषिः ।
गायत्री छन्दः । श्रीकालिका देवता ।
ह्रीं बीजम् । हूं शक्तिः । क्लीं कीलकम् ।
शत्रुसंघविनाशनार्थे जपे पाठे बिनियोगः । अथ न्यासः । भैरवऋषये नमः शिरसि । गायत्रीच्छन्दसे नमः मुखे । श्रीकालिकादेवतायै नमः हृदि । ह्रीं बीजाय नमः गुह्ये । हूं शक्तये नमः पादयोः । क्लीं कीलकाय नमः सर्वाङ्गे, एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करादिन्यासः, क्रां क्रीं क्रूं क्रैं क्रौं क्रः । इति करषडङ्गन्यासादिकंकुर्यात् ।

॥ अथ ध्यानम् ॥

ध्यायेत्कालीं महामायां त्रिनेत्रां बहुरूपिणीम् ।
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम् ॥ ७ ॥
नीलोत्पलसमप्रख्यां शत्रुसंघविदारिणीम् ।
नरमुण्डं तथा खड्गं कमलं वरदं तथा ॥ ८ ॥
बिभ्राणां रक्तवदनां दंष्ट्रालीं घोररूपिणीम् ।
अट्टाट्टहासनिरतां सर्वदा च दिगम्बराम् ॥ ९ ॥
शवासनस्थितां देवीं मुण्डमालाविभूषणाम् ।
इति ध्यात्वा महादेवीं ततस्तु कवचं पठेत् ॥१०॥
कालिका घोररूपाढ्या सर्वकामफलप्रदा ।
सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे ॥ ११ ॥
ॐ ह्रींस्वरूपिणी चैव ह्रां ह्रीं ह्रूं रूपिणी तथा ।
ह्रां ह्रीं क्षैं क्षौं स्वरूपा च सदा शत्रून् प्रणाशय ॥१२॥
श्रीं ह्रीं ऐं रूपिणी देवी भवबन्धविमोचिनी ।
ह्रां ह्रीं काली रिपूंश्चैव सा हन्तु मम सर्वदा ॥१३॥
यथा शुम्भो हतो दैत्यो निशुम्भश्च महासुरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैरिनाशाय वन्दे तां कालिकां शङ्करप्रियाम् ॥१४॥
ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका ।
कौमार्य्यैन्द्री च चामुण्डा खादन्तु मम विद्विषः ॥१५॥
सुरेश्वरी घोररूपा चण्डमुण्डविनाशिनी ।
मुण्डमालाधृताङ्गी च सर्वतः पातु मां सदा ॥१६॥

॥ अथ मन्त्रः ॥

ह्रां ह्रीं कालिके घोरदंष्ट्रे रुधिरप्रिये रुधिरपूर्णवक्त्रे रुधिरावृतस्तनि मम सर्वशत्रून् खादय खादय हिंस हिंस मारय मारय भिन्धि भिन्धि छिन्धि छिन्धि उच्चाटय उच्चाटय विद्रावय विद्रावय शोषय शोषय स्वाहा रां रीं कारायै मदीयशत्रून् मर्दय स्वाहा अर्क जय जय किर किर किट किट मर्द मर्द मोहय मोहय हर हर मम रिपून् ध्वंस ध्वंस भक्ष भक्ष त्रोटय त्रोटय यातुधानिका चामुण्डा सर्वजनान् राजपुरुषान् स्त्रियो मम वश्यं कुरु कुरु अश्वान् गजान् दिव्यकामिनिपुत्रान् राजाश्रयं देहि देहि नूतनं नूतनं धान्यं धनं यक्षं रक्षां क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्वाहा । इति मन्त्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ फलम् ॥

इत्येतत्कवचं पुण्यं कथितं शम्भुना पुरा ।
ये पठन्ति सदा तेषां ध्रुवं नश्यन्ति वैरिणः ॥१७॥
वैरिणः प्रलयं यान्ति व्याधिताश्च भवन्ति हि ।
धनहीनाः पुत्रहीनाः शत्रवस्तस्य सर्वदा ॥ १८ ॥
सहस्रपठनात्सिद्धिः कवचस्य भवेत्तथा ।
ततः कार्य्याणि सिध्यन्ति तथा शंकरभाषितम् ॥१९॥
श्मशानाङ्गारमादाय चूर्णं कृत्वा प्रयत्नतः ।
पादोदकेन पिष्ट्वा च लिखेल्लोहशलाकया ॥२०॥
भूमौ शत्रून् हीनरूपानुत्तराशिरसस्तथा ।
हस्तं दत्त्वा तद्धृदये कवचं तु स्वयं पठत् ॥ २१ ॥
प्राणप्रतिष्ठां कृत्वा वै तथा मन्त्रेण मन्त्रवित् ।
हन्यादस्त्रप्रहारेण शत्रोश्च कण्ठमक्षयम् ॥ २२ ॥
ज्वलदङ्गारलेपेन भवन्ति ज्वरिता भृशम् ।
प्रोक्षणैर्वामपादेन दरिद्रो भवति ध्रुवम् ॥ २३ ॥
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम् ।
परमैश्वर्य्यदं चैव पुत्रपौत्रादिवृद्धिदम् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभातसमये चैव पूजाकाले प्रयत्नतः ।
सायंकाले तथा पाठात् सर्वसिद्धिर्भवेद्ध्रुवम् ॥२५॥
शत्रुरुच्चाटनं याति देशाद्वै विच्युतो भवेत् ।
पश्चात्किङ्करतामेति सत्यं सत्यं न संशयः ॥ २६ ॥
शत्रुनाशकरं देवि सर्वसम्पत्करं शुभम् ।
सर्वदेवस्तुते देवि कालिके त्वां नमाम्यहम् ॥ २७ ॥

॥ इति श्रीकालिका कवचं समाप्तम् ॥

अथ कर्पूर-स्तवराजः

कर्पूरं मध्यमान्त्यस्वरपरहितं सेन्दुवामाक्षियुक्तं ।
बीजं ते मातरेतत् त्रिपुरहरवधु त्रिः कृतं ये जपन्ति ॥
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः ।
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥१॥
ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन् महेशि ।
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ॥
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-
बृन्दं चन्द्रार्द्धचूडे प्रभवति स महाघोरशावावतंसे ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो ।
बीजं ते द्वन्द्वमन्यद् विगलितचिकुरे कालिके ये जपन्ति ॥
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमभितो वश्यभावं नयन्ति ।
सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे कालिकेति ॥ ३ ॥
ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं ततोऽधः ।
सव्येऽभीतिं वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥
जप्त्वैतन् नाम ये वा तव विमलतनुं भावयन्त्येतदम्ब ।
तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥४॥
वर्णाद्यं वह्निसंस्थं विधुरतिललितं तत्त्रयं कूर्चयुग्मं ।
लज्जाद्वन्द्वं च पश्चात् स्मितमुखि तदधष्ठद्वयं योजयित्वा ॥
मातर्ये त्वां जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं ।
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥५॥
प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यम् ।
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ॥
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे ।
वाग्देवी देवि मुण्डस्रगतिशयलसत्कंठपीनस्तनाढ्ये ॥६॥
गतासूनां बाहुप्रकरकृतकाञ्चीपरिलसन्-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
प्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ॥७

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं संकीर्णायां प्रकटितचितायां हरवधूम् ॥
प्रविष्टां सन्तुष्टामुपरि सुरतेनातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८

वदामस्ते किं वा जननि वयमुच्चैर्जडधियो ।
न धाता नापीशो हरिरपि न ते वेत्ति परमम् ॥
तथापि त्वद्भक्तिर्मुखरयति चास्मानमिते
तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥९

समन्तादापीन- स्तन-जघन-धृग्यौवनवती—
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः ॥
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः ॥१०

समाः स्वस्थीभूतो जपति विपरीतां यदि सदा ।
विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ॥
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः ।
कराम्भोजे वश्या हरवधु महासिद्धिनिवहाः ॥११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसूते संसारं जननि जगतीं पालयति च ।
समस्तं क्षित्यादि प्रलयसमये संहरति च ॥
अतस्त्वं धाताऽसि त्रिभुवनपतिः श्रीपतिरपि ।
महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम् ॥१२
अनेके सेवन्ते भवदधिकगीर्वाणनिवहान् ।
विमूढास्ते मातः किमपि नहि जानन्ति परमम् ॥
समाराध्यामाद्यां हरिहरविरंच्यादिविबुधैः ।
प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम् ॥१३
धरित्री कीलालं शुचिरपि समीरोऽपि गगनं ।
त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ॥
स्तुतिः का ते मातर्निजकरुणया मामगतिकं ।
प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः ॥१४
श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः ।
सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम् ॥
जपंस्त्वत् प्रत्येकं मनुमपि तव ध्याननिरतो ।
महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥१५
गृहे संमार्जन्या परिगलितवीर्यं हि चिकुरं ।
समूलं मध्याह्ने वितरति चितायां कुजदिने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चार्यं प्रेम्णा मनुमपि सकृत् कालि सततं ।
गजारूढो याति क्षितिपरिबृढः सत्कविवरः ॥
स्त्रपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो ।
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम् ।
स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदी-
नदीनः पर्यन्ते परमपदलीनः प्रभवति ॥
त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ॥
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो ।
जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥
सलोमास्थि स्वैरं पललमपि मार्जारमसिते ।
परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा ॥
बलिं ते पूजायामपि वितरतां मर्त्यवसतां ।
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥
वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो ।
दिवा मातर्युष्मच्चरणकमलध्याननिरतः ॥
परं नक्तं नग्नो निधुवनविनोदेन च मनुं ।
जपेल्लक्षं स स्यात् स्मरहरसमानः क्षितितले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं स्त्रोत्रं मातस्तव मनुसमुद्धारणजनु ।
स्वरूपाख्यं पादम्बुजयुगलपूजाविधियुतम् ॥
निशार्धे वा पूजासमयमधि वा यस्तु पठति ।
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥
कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं ।
वशास्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ॥
रिपुः कारागारं कलयति च तं केलिकलया ।
चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥

इति श्रीमहाकालविरचितं
"श्रीदक्षिणकालिकायाः स्वरूपाख्यं स्तोत्रं"
समाप्तम् ।

काली-स्तोत्रम्

प्राग्देहस्थो यदाहं तव चरणयुगं नाश्रितो नार्चितोऽहं
तेनेवाद्यादिवर्गैं जठरजदहनो बाध्यमानो बलिष्ठैः ।
क्षिप्त्वा जन्मान्तरं नः पुनरिह भविता क्वाश्रयः क्वापि सेवा
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाल्ये बालाभिलापैर्जडितजडमतिर्बाललीलाप्रसक्तो
जानामि त्वां न मातः कलिकलुषहरां भोगमोक्षप्रदात्रीम् ।
नाचारो नैव पूजा न च यजनकथा न स्मृतिर्नैव सेवा
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥२॥

प्राप्तोऽहं यौवनं चेद्विषधरसदृशैरिन्द्रियैर्दष्टगात्रो
नष्टप्रज्ञः परस्त्रीपरधनहरणे सर्वदा साभिलाषः ।
त्वत्पादाम्भोजयुग्मं क्षणमपि मनसा न स्मृतोऽहं कदापि
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥३॥

प्रौढो भिक्षाभिलाषी सुतदुहितृकलत्रार्थमन्नादिचेष्टः
क्व प्राप्स्ये कुत्र यामीत्यनुदिनमनिशं चिन्तया मग्नदेहः ॥
नो ते ध्यानं न चास्था नच भजनविधिर्नामसंकीर्तनं वा
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥४॥

वृद्धत्वे बुद्धिहीनः कृशविवशतनुः श्वासकासातिसारैः
कर्णानहोंऽक्षिहीनः प्रगलितदशनः क्षुत्पिपासाभिभूतः
पश्चात्तापेन दग्धो मरणमनुदिनं ध्येयमात्रं न चान्यत्
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥५॥

कृत्वा स्नानं दिनादौ क्वचिदपि सलिलं नोकृतं नैव पुष्पं
ते नैवेद्यादिकञ्च क्वचिदपि न कृतं नापि भावो न भक्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न न्यासो नैव पूजा न च गुणकथनं नापि चर्चा कृता ते
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥ ६ ॥
जानामि त्वां न चाहं भवभयहरणीं सर्वसिद्धि प्रदात्रीं
नित्यानन्दोदयाढ्यां त्रितयगुणमयीं नित्यशुद्धोदयाढ्याम् ॥
मिथ्या कर्माभिलाषैरनुदिनमभितः पीडितो दुःखसंघैः
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥ ७ ॥
कालाभ्राश्यामलाङ्गीं विगलितचिकुरां खड्गमुण्डाभिरामाम्
त्रासत्राणेष्टदात्रीं कुणपगणशिरोमालिनीं दीर्घनेत्राम् ॥
संसारस्यैकसारां भवजननहरां भावितो भावनाभिः
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥ ८ ॥
ब्रह्मा विष्णुस्तथेशः परिणमति सदा त्वत्पदाम्भोजयुग्मं
भाग्याभावान्नचाहं भवजननि भवत्पादयुग्मं भजामि ॥
नित्यं लोभप्रलोभैः कृतविवशमतिः कामुकस्त्वां प्रयाचे
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥९॥
रागद्वेषैः प्रमत्तः कलुषयुततनुः कामनाभोगलुब्धः
कार्याकार्याविचारी कुलमतिरहितः कौलसंघैर्विहीनः
क्व ध्यानं ते क्व चर्चा क्व च मनुजपनं नैव किञ्चित्कृतोऽहम्
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगी दुःखी दरिद्री परवशकृपणः पांशुलः पापचेताः
निद्रालस्यप्रसक्ताः सुजठरभरणे व्याकुलः कल्पितात्मा ।
किन्ते पूजाविधानं त्वयि क्वाचनुमतिः क्वानुरागः क्वाचास्था,
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥११॥
मिथ्या व्यामोहरागैः परिवृतमनसः क्लेशसङ्घान्वितस्य
क्षुन्निद्रौघान्वितस्य स्मरणविरहिणः पापकर्मप्रवृत्तेः ॥
दारिद्र्यस्य क्वधर्मः क्व च जननि रुचिः क्वास्थितिः साधुसंघैः
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥१२॥
मातस्तातस्य देहाज्जननि जठरगः संस्थितस्तद्वशेऽहं
त्वं हर्त्री कारयित्री करणगुणमयी कर्महेतुस्वरूपा ॥
त्वं बुद्धिश्चित्तसंस्थाप्यहमतिभवती सर्वमेतत्क्षमस्व
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥१३॥
त्वं भूमिस्त्वं जलञ्च त्वमसिहुतवहस्त्वं जगद्वायुरूपा
त्वञ्चाकाशं मनश्च प्रकृतिरसि महत्पूर्विका पूर्वपूर्वा ॥
आत्मा त्वञ्चासि मातः परमपि भवती त्वत्परं नैवकिञ्चित्,
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥ १४ ॥
त्वं काला त्वं च तारा त्वमसिगिरिसुता सुन्दरी भैरवी त्वम्
त्वं दुर्गा छिन्नमस्ता त्वमसिच भुवना त्वं हि शिवा त्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूमा मातङ्गिनी त्वं त्वमसि बगला मङ्गलादिस्तवाख्या,
क्षन्तव्यो मेऽपराधः प्रकटितवदने कामरूपे कराले ॥ १५ ॥
स्तोत्रेणानेन देवीं परिणमति जनो यः सदा भक्तियुक्तो
दुष्कृत्या दुर्गसङ्घं परितरति शतं विघ्नता नाश मेति ॥
नाधिर्व्याधिः कदाचिद्भवति यदि पुनः सर्वदा सापराधः
सर्वं तत्कामरूपे त्रिभुवजननि क्षामये पुत्रबुद्ध्या ॥ १६ ॥
ज्ञाता वक्ता कवीशो भवति धनपतिर्दानशीलोदयात्मा
निःपापी निः कलङ्की कुलपतिकुशलः सत्यवाग्धर्मिकश्चः
नित्यानन्दो दयाढ्यः पशुगुणविमुखः सत्पथाचारशीलः
संसाराब्धिं सुखेन प्रतरति गिरिजापादयुग्मावलम्बात् ॥१७॥

कालीकवचम्

भैरव्युवाच

काली पूजा श्रुतानाथ भावाश्च विविधाः प्रभो ।
इदानीं श्रोतु मिच्छामि कवचं पूर्वसूचितम् ॥१॥
त्वमे स्रष्टा पाता च संहर्ता च त्वमेवहि ।
त्वमेव शरणं नाथ त्राहि मां दुःखसंकटात् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भैरव उवाच ॥

रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे ।
श्रीजगन्मङ्गलं नाम कवचं मन्त्रविग्रहम् ॥३॥
पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्क्षणात् ।
नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरम् ॥४॥
योगिनं क्षोभमनयद् यद्धृत्वा च रघूत्तमः ।
वरतृप्तो जघानैव रावणादिनिशाचरान् ॥५॥
यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी विभुः ।
धनाधिपः कुवेरोऽपि सुरेशोऽभूच्छचीपतिः ॥६॥
एवं हि सकला देवाः सर्वसिद्धीश्वराः प्रिये ।
श्रीजगन्मङ्गलस्यास्य कवचस्य ऋषिः शिवः ॥७॥
छन्दोऽनुष्टुब्देवता च कालिका दक्षिणेरिता ।
जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु ॥८॥
योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः ।
शिरो मे कालिका पातु क्रींकारैकाक्षरी परा ॥९॥
क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधारिणी ।
हूँ हूँ पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणे कालिका पातु घ्राणयुग्मं महेश्वरी ।
क्रीं क्रीं क्रीं रसनां पातु हूँ हूँ पातु कपोलकम् ॥११॥
वदनं सकलं पातु ह्रीं ह्रीं स्वाहास्वरूपिणी ।
द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखप्रदा ॥१२॥
खड्गमुण्डधरा काली सर्वाङ्गमभितोऽवतु ।
क्रीं हूँ ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयं मम ॥१३॥
ऐं हूँ ओं ऐं स्तन द्वन्द्वं ह्रीं फट्स्वाहा ककुत्स्थकम् ॥
अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका ।
क्रीं क्रीं ह्रीं ह्रीं हूं हूं पातु करौ षडक्षरी मम ।
क्रीं मध्यं नाभिदेशंच दक्षिणे कालिकावतु ॥१५॥
क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्षरी ।
क्रीं मे गुह्यं सदा पातु कालिकायै नमस्ततः ॥१६॥
सप्ताक्षरी महाविद्या सर्वतन्त्रेषु गोपिता ।
ह्रीं ह्रीं दक्षिणे कालिके हूँ हूँ पातु कटिद्वयम् ॥१७॥
काली दशाक्षरी विद्या स्वाहा मामूरुयुग्मकम् ।
ओं क्रीं क्रीं मे स्वाहा पातु कालिका जानुनी सदा॥१८
काली हृन्नामविद्येयञ्चतुर्वर्गफलप्रदा ।
क्रीं ह्रीं ह्रीं पातु सा गुल्फं दक्षिणे कालिकावतु ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम ।
खड्गमुण्डधरा काली वरदाभयधारिणी ॥२०॥
विद्याभिः सकलाभिः सा सर्वाङ्गमभितोऽवतु ।
काली कपालिनी कुल्ला कुरुकुल्ला विरोधनी ॥२१॥
विप्रचित्ता तथोग्रोग्रप्रभादीप्ता घनत्विषा ।
नीला घना बलाका च मात्र मुद्रा मिता च माम् ॥२२
एताः सर्वाः खड्गधरा मुण्डमाला विभूषणाः ।
रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा ॥२३
माहेश्वरी च चामुण्डा कौमारी चापराजिता ।
वाराही नारसिंहीं च सर्वाश्चामितभूषणाः ॥२४॥
रक्षन्तु स्वायुधैर्दिक्षु विदिक्षु मां यथातथा ।
इति ते कथितं दिव्यं कवचं परमाद्भुतम् ॥२५॥
श्रीजगन्मङ्गलं नाम महाविद्यौघविग्रहम् ।
त्रैलोक्याकर्षणं ब्रह्मन् कवचं मन्मुखोदितम् ॥२६॥
गुरुपूजां विधायाथ विधिवत् प्रपठेत्ततः ।
कवचं त्रिःसकृद्वापि यावज्जीवं च वा पुनः ॥२७॥
एतच्छतार्द्धमावृत्य त्रैलोक्यविजयी भवेत् ।
त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकविर्भवेन्मासात् सर्वसिद्धीश्वरो भवेत् ।
पुष्पाञ्जलीन् कालिकायै मूलेनैवार्पयेत् सकृत् ॥२९॥
शतवर्षसहस्राणां पूजायाः फलमाप्नुयात् ।
भूर्जे विलिखितं चैतत्स्वर्णस्थं धारयेद्यदि ॥३०॥
विशाखायां दक्षवाहौ कण्ठे वा धारयेद्यदि ।
त्रैलोक्यं मोहयेत्क्रोधात् त्रैलोक्यं चूर्णयेत्क्षणात् ॥३१
पुत्रवान् धनवान् श्रीमान् नानाविद्यानिधिर्भवेत् ।
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः ॥३२॥
नाशमायान्ति, या नारी वन्ध्या वा मृतपुत्रिणी ।
वह्वपत्या जीवतोका भवत्येव न संशयः ॥३३॥
न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः ।
शिष्येभ्यो भक्तियुक्तेभ्योह्यन्यथा मृत्युमाप्नुयात् ॥३४
स्पर्द्धामुद्धूय कमला वाग्देवी मन्दिरे शुभे ।
पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम् ॥
इदं कवचमज्ञात्वा यो भजेद्घोरदक्षिणाम् ।
शतलक्षं प्रजप्त्वापि तस्य विद्या न सिध्यति ॥
सहस्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काली हृदयम्

॥ श्रीमहाकाल उवाच ॥

महाकौतूहलं स्तोत्रं हृदयाख्यं महोत्तमम् ।
शृणु प्रिये महागोप्यं दक्षिणायाः सुगोपितम् ।१॥
अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितम् ।
अन्येभ्यः कुरु गोप्यं च सत्यं सत्यं च शैलजे ॥२॥

॥ देव्यु उवाच ॥

कस्मिन् युगे समुत्पन्नं केन स्तोत्रं कृतं पुरा ।
तत्सर्वं कथ्यतां शंभो महेश्वर दयानिधे ॥३॥

॥ श्रीमहाकाल उवाच ॥

पुरा प्रजापतेशीर्षच्छेदनं कृतवानहम् ।
ब्रह्महत्याविनाशाय कृतं स्तोत्रं दयानिधे ॥
ब्रह्महत्याविनाशाय कृतं स्तोत्रं मया प्रिये ।
कृत्याविनाशकं स्तोत्रं ब्रह्महत्यापहारकम् ॥
ओं अस्य श्रीदक्षिणाकालिकायाः हृदयस्तोत्र मन्त्रस्य महाकाल ऋषिः उष्णिक् छन्दः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीदक्षिणकालिकादेवता क्रीं बीजं ह्रीं शक्तिः ।
नमः कीलकं सर्वत्र सर्वदा जपे विनियोगः ॥
ओं क्रां हृदया नमः क्रीं शिरसे स्वाहा, ओं क्रैं
कवचाय हुम्, ओं क्रौ नेत्र त्रयाय वौषट् ओं क्रः
अस्त्राय फट् ।

॥ अथ ध्यानम् ॥

ध्यायेत् कालीं महामायां त्रिनेत्रां बहुरूपिणीम् ।
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम् ॥१॥
नीलोत्पलदलश्यामां शत्रुसंघविदारिणीम् ।
नरमुण्डं तथा खड्गं कमलं वरदं तथा ॥ २ ॥
बिभ्राणां रक्तवदनां दंष्ट्रालीं घोररूपिणीम् ।
अट्टाट्टहासनिरतां सर्वदा च दिगम्बराम् ॥ ३ ॥
शवासनस्थितां देवीं मुण्डमालाविभूषिताम् ।
इति ध्यात्वा महादेवीं ततस्तु हृदयं पठेत् ॥ ४ ॥
ओं कालिका घोररूपाद्या सर्वकामफलप्रदा ।
सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे ॥ ५ ॥
ह्रीं ह्रीं स्वरूपिणी श्रेष्ठा त्रिषु लोकेषु दुर्लभा ।
तव स्नेहान्मयाख्यातं न देयं यस्य कस्यचित् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ ध्यानं प्रवक्ष्यामि निशामय परात्मिके ।
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यति ॥७॥
नाग यज्ञोपवीतां च चन्द्रार्धकृतशेखराम् ।
जटाजूटं च सञ्चिन्त्य महाकालसमीपगाम् ॥८॥
एवं न्यासादयः सर्वे ये प्रकुर्वन्ति मानवाः ।
प्राप्नुवन्ति च ते मोक्षं सत्यं सत्यं वरानने ॥९॥
यन्त्रं शृणु परं देव्याः सर्वसिद्धार्थदायकम् ।
गोप्याद् गोप्यतरं गोप्यं गोप्याद् गोप्यतरं महत् ॥१०
त्रिकोणं पञ्चकं चाष्टकमलं भूपुरान्वितम् ।
मुण्डपङ्क्तिं च ज्वालां च कालीयन्त्रं सुसिद्धिदम् ॥
मन्त्रं तु पूर्वकथितं धारयस्व सदा प्रिये ।
देव्या दक्षिणकाल्यास्तु नाममालां निशामय ॥१२॥
काली दक्षिणकाली च कृष्णरूपा परात्मिका ।
मुण्डमाली विशालाक्षी सृष्टिसंहारकारिका ॥१३॥
स्थितिरूपा महामाया योगनिद्रा भगात्मिका ।
भगसर्पिःपानरता भगोद्योता भगाङ्गजा ॥१४॥
आद्या सदा नवा घोरा महातेजाः करालिका ।
प्रेतवाहा सिद्धलक्ष्मीरनिरुद्धा सरस्वती ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतानि नाममालयानि ये पठन्ति दिने दिने ।
तेषां दासस्य दासोऽहं सत्यं सत्यं महेश्वरी ॥१६॥
कालीं कालहरां देवीं कङ्कालबीजरूपिणीम् ।
काकरूपां कलातीतां कालिकां दक्षिणां भजे ॥१७
कुण्डगोलप्रियां देवीं स्वयंभूकुसुमेरिताम् ।
रतिप्रियां महारौद्रीं कालिकां प्रणमाम्यहम् ॥१८॥
दूतीप्रियां महादूतीं दूतीयोगेश्वरीं पराम् ।
दूतीयोगोद्भवरतां दूतीरूपां नमाम्यहम् ॥१९॥
क्रीं मन्त्रेण जलं जप्त्वा सप्तधा सेचनेन तु ।
सर्वे रोगा विनाश्यन्ति नात्रकार्या विचारणा ॥२०
क्रीं स्वाहान्तैर्महामन्त्रैश्चन्दनं साधयेत्ततः ।
तिलकं क्रियते प्राज्ञै र्लोकोवश्यो भवेत्सदा ॥२१॥
क्रीं हूं ह्रीं मन्त्रजप्तेन चाक्षतं सप्तभिः प्रिये ।
महाभयविनाशश्च जायते नात्र संशयः ॥२२॥
क्रीं ह्रीं ह्रीं स्वाहा मन्त्रेण श्मशानाग्निं च मन्त्रयेत्
शत्रोर्गृहे प्रतिक्षिप्ता शत्रोर्मृत्युर्भविष्यति ॥२३॥
ह्रीं ह्रीं क्रीं चैव उच्चाटे पुष्पं संशोध्य सप्तधा ।
रिपूणां चैवचोच्चाटं नयत्येव न संशयः ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकर्षणे क्रीं क्रीं क्रीं जप्त्वाक्षतं प्रतिक्षिपेत् ।
सहस्रयोजनस्था च शीघ्र मागच्छति प्रिये ॥२५॥
क्रों क्रीं ह्रू ह्रू ह्रों ह्रीं च कज्जलं शोधितं तथा ।
तिलकेन जगन्मोहं सप्तधा मन्त्रमाचरेत् ॥२६॥
हृदयं परमेशानि सर्वपापहरं परम् ।
अश्व मेधादि यागानां कोटि-कोटि गुणोत्तरम् ॥२७॥
कन्यादानादिदानानां कोटि-कोटि गुणं फलम् ।
दूतीयागादियागानां कोटि-कोटिफलं स्मृतम् ॥२८॥
गङ्गादिसर्वतीर्थानां फलं कोटिगुणं स्मृतम् ।
एकधा पाठमात्रेण सत्यं-सत्यं मयोदितम् ॥२९॥
कौमारीस्वेष्टरूपेण पूजां कृत्वा विधानतः ।
पठेत्स्तोत्रं महेशानि जीवन् मुक्तः स उच्यते ॥३०॥
रजस्वलाभगं दृष्ट्वा पठेदेकाग्रमानसः ।
लभते परमं स्थानं देवी लोके वरानने ॥३१॥
महादुःखे महारोगे महासंकटके दिने ।
महाभये महाघोरे पठेत् स्तोत्रं महोत्तमम् ॥
सत्यं सत्यं पुनः सत्यं गोपयेन् मातृयोनिवत् ॥३२॥

॥ आद्योपनिषद् ॥

अथ हैनां ब्रह्मरंध्रे ब्रह्मस्वरूपिणी माप्नोति सुभगां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामरेफेन्दिरां समष्टिरूपिणीमादौ तदन्वकर्तुं वीजद्वय कूर्चवीजं तद्धोमषष्ठस्वरविन्दुमेलनं रूपं तदनु भुवनाद्वयभुवना तु व्योमज्वलनेन्दिरा शून्यमेलनरूपा दक्षिणे कालिके वेत्यभिमुखंगता तदनुवीजसप्तकमुच्चार्य वृहद्भानुजायामुच्चरेत् । अयं सर्वमन्त्रोत्तमोत्तम इमं सकृद्जपन् स तु विश्वेश्वरः स तु नारीश्वरः स तु वेदेश्वरः स तु सर्वगुरुः सर्वनमस्यः सर्वेषु वेदेष्वधिष्ठितो भवति सर्वेषु तीर्थेषु स्नातो भवति सर्वेषु यज्ञेषु दीक्षितो भवति स स्वयं सदाशिवः त्रिकोणं त्रिकोणं त्रिकोणं पुनश्चैव त्रिकोणं त्रिकोणं ततो वसुदलं सार्द्ध चन्द्र-केशरं युग्मशो विलिख्य संभृतभूपुरैकेन युतं सर्वज्ञेनाभ्यर्च्य तस्मिन् देवीदले रेखायां विन्यस्य ध्येया अभिनवजलदवदना घनस्तनो कुटिल दंष्ट्रा शवासना वराभयखङ्गमुण्डमण्डितहस्ता कालिका ध्येया काली कपालिनी कुल्ला कुरु-कुल्ला विरोधिनी विप्रचित्तेति षट्कोणगाः उग्रा उग्रप्रभा दीप्ता नीला घना बालका मात्रा मुद्रामि-तेति नवकोणगा इत्थं पञ्चदशकोणगाः । ब्राह्मी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारायणी माहेश्वरी चामुण्डा कौमारी अपराजिता वाराही नारसिंहीत्यष्टपत्रगाः । चतुष्कोणगाश्चत्वारो देवाः माधवरुद्र बिनायक सौराः । चतुर्दिक्षु इन्द्रयमवरुणकुबेराः । देवीं सर्वाङ्गेनादौ संपूज्य भगोदकेन तर्पणं पञ्चमकारेण पूजनमेतस्याः सपर्यायाः किमधिकं नो शक्यं ब्रह्मादिपद हेयं हेलया प्राप्नोति । एतस्या एक द्वित्रिक्रमेण मनवो भवन्ति नारिमित्रादिलक्षणमत्र वर्तते अमुष्य मन्त्र पाठकस्य गतिरस्ति नान्यस्येह गतिरस्ति । एतस्यास्तारामनोर्दुर्गामनोर्वा सिद्धिः । इदानीं तु सर्वाः स्वप्नभूता असितैव जागर्ति । इमामसिताज्ञामुपनिषदं यो वाधीते सोऽपुत्रो पुत्री भवति निर्धनो धनायति धर्मार्थकाममोक्षाणां पात्रीयत्यन्यस्यवरद दृष्ट्वा जगन्मोहयति क्रोधस्तं जहाति गङ्गादितीर्थक्षेत्राणामग्निष्टोमादियागानां फलभागीयति इत्यथर्ववणवेदे सौभाग्यकाण्डोपनिषत् समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालीशतनाम-६

भैरव उवाच ॥

शतनाम प्रवक्ष्यामि कालिकाया वरानने ।
यस्य प्रपठनाद्वाग्मी सर्वत्र विजयी भवेत् ।१॥
काली कपालिनी कान्ता कामदा काम सुन्दरी ।
कालरात्रिः कालिका च काल-भैरव-पूजिता ॥२॥
कुरुकुल्ला कामिनी च कमनीयस्वभाविनी ।
कुलीना कुलकर्त्री च कुलवर्त्मप्रकाशिनी ॥३॥
कस्तूरीरसनीला च काम्या कामस्वरूपिणी ।
ककारवर्णनिलया कामधेनुः करालिका ॥४॥
कुलकान्ता करालास्या कामार्त्ता च कलावती ।
कृशोदरी च कामाख्या कौमारी कुलपालिनी ॥५॥
कुलजा कुलकन्या च कलहा कुलपूजिता ।
कामेश्वरी कामकान्ता कुञ्जरेश्वरगामिनी ॥६॥
कामदात्री कामहर्त्री कृष्णा चैव कपर्दिनी ।
कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता ॥७॥
काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा ।
क्रीं रूपा कुलगम्या च कमला कृष्णपूजिता ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी ।
कम्बुकण्ठी कौलिनी च कुमुदा कामजीविनी ॥९॥
कुलस्त्री कीर्तिका कृत्या कीर्त्तिश्च कुलपालिका ।
कामदेवकला कल्पलता कामाङ्गवर्द्धिनी ॥१०॥
कुन्ता च कुमुदप्रीता कदम्बकुसुमोत्सुका ।
कादम्बिनी कमलिनी कृष्णानन्दप्रदायिनी ॥११॥
कुमारीपूजनरता कुमारीगणशोभिता ।
कुमारीरञ्जनरता कुमारीव्रतधारिणी ॥१२॥
कङ्काली कमनीया च कामशास्त्रविशारदा ।
कपालखट्वाङ्गधरा काल-भैरवरूपिणी ॥१३॥
कोटरी कोटराक्षी च काशी कैलासवासिनी ।
कत्यायनी कार्यकरी काव्यशास्त्र विनोदिनी ॥१४॥
कामाकर्षणरूपा च कामपीठनिवासिनी ।
कङ्किनी काकिनी क्रीडा कुत्सिता कलहप्रिया ॥१५॥
कुण्डगोलोद्भवप्राणा कौशिकी कीर्त्तिवर्द्धिनी ।
कुम्भस्तनी कटाक्षा च काव्या कोकनदप्रिया ॥१६॥
कान्तारवासिनी कान्तिः कठिना कृष्णवल्लभा ।
इति ते कथितं देवि गुह्याद्गुह्यतरं परम् ॥१७॥
पठेद्य इदं नित्यं कालीनामशताष्टकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिषु लोकेषु देवेशि तस्यासाध्यं न विद्यते ॥१८॥
प्रातःकाले च मध्याह्ने सायाह्ने च सदानिशि ।
यः पठेत् परया भक्त्या कालीनाम शताष्टकम् ॥१९॥
कालिका तस्य देहे च संस्थानं कुरुते सदा ।
शून्यागारे श्मशाने च प्रान्तरे जलमध्यतः ॥२०॥
वह्निमध्ये च संग्रामे तथा प्राणस्य संशये ।
शताष्टकं जपन् मन्त्री लभते क्षेममुत्तमम् ॥२१॥
कालीं संस्थाप्य विधिवत् स्तुत्वा नामशताष्टकैः ।
साधकः सिद्धिमाप्नोति कालिकायाः प्रसादतः ॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककारादिकालिसहस्रनामस्तोत्रम्

ओमस्य श्रीसर्वसाम्राज्यमेधानाम कालीरूप-ककारात्मकसहस्रनामस्तोत्रमन्त्रस्य महाकाल ऋषि-रनुष्टुप् छन्दः श्रीदक्षिणमहाकाली देवता, ह्रीं बीजम्, हूँ शक्तिः, क्रीं कीलकं कालीवरदानाद्यखि-लेष्टार्थे जपे विनियोगः ।

ॐ क्रीं काली क्रूं कराली च कल्याणी कमला कला ।
कलावती कलाढ्या च कलापूज्या कलात्मिका ॥१॥
कलाहृष्टा कलापुष्टा कलामस्ता कलाधरा ।
कलाकोटिसमाभासा कलाकोटिप्रपूजिता ॥२॥
कलाकर्मकलाधारा कलापारा कलागमा ।
कलाधारा कमलिनी ककारा करुणा कविः ॥३॥
ककारवर्णसर्वाङ्गी कलाकोटिप्रभूषिता ।
ककारकोटिगुणिता ककारकोटिभूषणा ॥४॥
ककारवर्णहृदया ककारमनुमण्डिता ।
ककारवर्णनिलया ककशब्दपरायणा ॥५॥
ककारवर्णमुकुटा ककारवर्णभूषणा ।
ककारवर्णरूपा च ककशब्दपरायणा ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककवीरास्फालरता कमलाकरपूजिता ।
कमलाकरनाथा च कमलाकररूपधृक् ॥७॥
कमलाकरसिद्धिस्था कमलाकरपारदा ।
कमलाकरमध्यस्था च कमलाकरतोषिता ॥८॥
कथङ्कारपरालापा कथङ्कारपरायणा ।
कथङ्कारपदान्तस्था कथङ्कारपदार्थभूः ॥९॥
कमलाक्षी कमलजा कमलाक्षप्रपूजिता ।
कमलाक्षवरोद्युक्ता ककारा कर्बुराक्षरा ॥१०॥
करतारा करच्छिन्ना करश्यामा करार्णवा ।
करपूज्या कररता करदा करपूजिता ॥११॥
करतोया करामर्षा कर्मनाशा करप्रिया ।
करप्राणा करकजा करका करकान्तरा ॥१२॥
करकाचलरूपा च कारकाचलशोभिनी ।
कारकाचलपुत्री च कारकाचलतोषिता ॥१३॥
करकाचलगेहस्था करकाचलरक्षिणी ।
करकाचलसम्मान्या करकाचलकारिणी ॥१४॥
कारकाचलवर्षाढ्या कारकाचलरञ्जिता ।
करकाचलकान्तारा करकाचलमालिनी ॥१५॥
करकाचलभोज्या च करकाचलरूपिणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करामलककाली च करामलकरोचिनी ॥१७॥
करामलकमाता च करामलकसेविनी ।
करामलकवद्ध्येया करालकदायिनी ॥१८॥
कञ्जनेत्रा कञ्जगतिः कञ्जस्था कञ्जधारिणी ।
कञ्जमालाप्रियकरी कञ्जरूपा च कञ्जगा ॥१९॥
कञ्जजातिः कंजगतिः कंजहोमपरायणा ।
कंजमण्डलमध्यस्था कंजाभरणभूषिता ॥२०॥
कंजसम्माननिरता कंजोत्पत्तिपरायणा ।
कंजराशिसमाकारा कंजारण्यनिवासिनी ॥२१॥
करंजवृक्षमध्यस्था करंजवृक्षवासिनी ।
करंजफलभूषाढ्या करंजारण्यवासिनी ॥२२॥
करंजमालाभरणा करवालपरायणा ।
करवालप्रहृष्टात्मा करवालप्रियागतिः ॥२३॥
करवालप्रियाकन्था करवालविहारिणी ।
करवालमयीकर्मा करवालप्रियङ्करी ॥२४॥
कबन्धमालाभरणा कबन्धराशिमध्यगा ।
कबन्धकूटसंस्थाना कबन्धानन्तभूषणा ॥२५॥
कबन्धनादसन्तुष्टा कबन्धासनधारिणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कबन्धगृहमध्यस्था कबन्धवनवासिनी ॥२६॥
कबन्धकांचीकरणी कबन्धराशिभूषणा ।
कबन्धमालाजयदा कबन्धदेहवासिनी ॥२७॥
कबन्धासनमान्या च कपालमाल्यधारिणी ।
कपालमालामध्यस्थ कपालव्रततोषिता ॥२८॥
कपालदीपसन्तुष्टा कपालदीपरूपिणी ।
कपालदीपवरदा कपालकज्जलस्थिता ॥२९॥
कपालमालाजयदा कपालजपतोषिणी ।
कपालसिद्धिसंहृष्टा कपालभोजनोद्यता ॥३०॥
कपालव्रतसंस्थाना कपालकमलालया ।
कवित्वामृतसारा च कवित्वामृगसागरा ॥३१॥
कवित्वसिद्धिसंहृष्टा कवित्वादानकारिणी ।
कविपूज्या कविगति। कविरूपा कविप्रिया ॥३२॥
कविब्रह्मानन्दनरूपा कवित्वव्रततोषिता ।
कविमानससंस्थाना कविवांछाप्रपूरिणी ॥३३॥
कविकण्ठस्थिता कंह्रींकंकंकविपूर्तिदा ।
कज्जला कज्जलादानमानसा कज्जलप्रिया ॥३४॥
कपालकज्जलसमा कज्जलेशप्रपूजिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कज्जलार्णवमध्यस्था कज्जलानन्दरूपिणी ॥३५॥
कज्जलाप्रियसन्तुष्टा कज्जलप्रियतोषिणी ।
कपालमालाभरणा कपालकरभूषणा ॥३६॥
कपालकरभूषाढ्या कपालचक्रमण्डिता ।
कपालकोटिनिलया कपालदुर्गकारिणी ॥३७॥
कपालगिरिसंस्थाना कपालचक्रवासनी ।
कपालपात्रसन्तुष्टा कपालर्घ्यपरायणा ॥३८॥
कपालार्घ्यप्रियप्राणा कपालार्घ्यवरप्रदा ।
कपालचक्ररूपा च कपालरूपमात्रगा ॥३९॥
कदली कदलीरूपा कदलीवनवासिनी ।
कदलीपुष्पसम्प्रीता कदलीफलमानसा ॥४०॥
कदलीहोमसन्तुष्टा कदलीदर्शनोद्यता ।
कदलीगर्भमध्यस्था कदलीवनसुन्दरी ॥४१॥
कदम्बपुष्पनिलया कदम्बवनमध्यगा ।
कदम्बकुसुमामोदा कदम्बवनतोषिणी ॥४२॥
कदम्बपुष्पसम्पूज्या कदम्बपुष्पहोमदा ।
कदम्बपुष्पमध्यस्था कदम्बफलभोजिनी ॥४३॥
कदम्बकाननान्तःस्था कदम्बाचलवासिनी ।
कक्षपा कक्षपाराध्या कक्षपासनसंस्थिता ॥४४॥
कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलंप्रीता कलहदा यलहा कलहातुरा ॥४५॥
कर्ण्णयक्षी कर्ण्णवार्त्ता कथिनी कर्ण्णसुन्दरी ।
कर्ण्णपिशाचिनी कर्ण्णमंजरी कपिकक्षदा ॥४६॥
कविकक्षविरूपाढ्या कविकक्षस्वरूपिणी ।
कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी ॥४७॥
कस्तूरीमृगसंतोषा कस्तूरीमृगमध्यगा ।
कस्तूरीरसनीलाङ्गी कस्तूरीगन्धतोषिता ॥४८॥
कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया ।
कस्तूरीप्रेमसन्तुष्टा कस्तूरीप्राणधारिणी ॥४९॥
कस्तूरीपूजकानन्दा कस्तूरीगन्धरूपिणी ।
कस्तूरीमालिकारूपा कस्तूरीभोजनप्रिया ॥५०॥
कस्तूरीतिलकानन्दा कस्तूरीतिलकप्रिया ।
कस्तूरीहोमसन्तुष्टा कस्तूरीतर्पणोद्यता ॥५१॥
कस्तूरीमार्ज्जनोद्युक्ता कस्तूरीचक्रपूजिता ।
कस्तूरीपुष्पसम्पूज्या कस्तूरीचर्वणोद्यता ॥५२॥
कस्तूरीगर्भमध्यस्था कस्तूरीवस्त्रधारिणी ।
कस्तूरिकामोदरता कस्तूरीवनवासिनी ॥५३॥
कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्तूरीशक्तिनिलया कस्तूरीशक्तिकुण्डगा ॥५४॥
कस्तूरीकुण्डसंस्नाता कस्तूरीकुण्डमज्जना ।
कस्तूरीजीवसन्तुष्टा कस्तूरीजीवधारिणी ॥५५॥
कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा ।
कस्तूरीजातिभावस्था कस्तूरीगन्धचुम्बना ॥५६॥
कस्तूरीगन्धसंशोभा-विराजित-कपालभूः ।
कस्तूरीमदनान्तःस्था कस्तूरीमदहर्षदा ॥५७॥
कस्तूरीकविताढ्या च कस्तूरीगृहमध्यगा ।
कस्तूरीस्पर्शकप्राणा कस्तूरीविन्दकान्तका ॥५८॥
कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता ।
कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥५९॥
कस्तूरीस्थापनाशक्ता कस्तूरीस्थानरञ्जिनी ।
कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवन्दिता ॥६०॥
कस्तूरीवन्दकाराध्या कस्तूरीस्थानवासिनी ।
कहरूपा कहाढ्या च कहानन्दा कहात्मभूः ॥६१॥
कहपूज्या कहाख्या च कहहेया कहात्मिका ।
कहमाला कण्ठभूषा कहमन्त्रजपोद्यता ॥६२॥
कहनामस्मृतिपरा कहनामपरायणा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कहपरायणारता कहदेवी कहेश्वरी ॥६३॥
कहहेतुः कहानन्दा कहनादपरायणा ।
कहमाता कहान्तस्था कहमन्त्रा कहेश्वरी ॥६४॥
कहगेया कहाराध्या कहध्यानपरायणा ।
कहतन्त्रा कहकहा कहचर्य्यापरायणा ॥६५॥
कहाचारा कहगतिः कहताण्डवकारिणी
कहारण्या कहगतिः कहशक्तिपरायणा ॥६६॥
कहराज्यनता कर्म्मसाक्षिणी कर्म्मसुन्दरी ।
कर्म्मविद्या कर्म्मगतिः कर्म्मतन्त्रपरायणा ॥६७॥
कर्म्ममात्रा कर्म्मगात्रा कर्म्मधर्म्मपरायणा ।
कर्म्मरेखानाशकर्त्री कर्म्मरेखाविनोदिनी ॥६८॥
कर्म्मरेखामोहकारी कर्म्मकीर्त्तिपरायणा ।
कर्म्मविद्या कर्म्मसारा कर्म्माधारा च कर्म्मभूः ॥६९॥
कर्मकारी कर्महारी कर्मकौतुकसुन्दरी ।
कर्म्मकाली कर्मतारा कर्मच्छिन्ना च कर्मदा ॥७०॥
कर्मचाण्डालिनी कर्मवेदमाता च कर्मभूः ।
कर्मकाण्डरतानन्ता कर्मकाण्डानुमानिता ॥७१॥
कर्मकाण्डपरीणाहा कमठी कमठाकृतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कमठाराध्यहृद्या कमठा कण्ठसुन्दरी ॥७२॥
कमठासनसंसेव्या कमठीकर्मतत्परा ।
करुणाकरकान्ता च करुणाकरवन्दिता ॥७३॥
कठोरा करमाला च कठोरकुचधारिणी ।
कपर्दिनी कपटिनी कठिनी कङ्कभूषणा ॥७४॥
करभोरूः कठिनदा करभा करभालया ।
कलभाषामयी कल्पा कल्पना कल्पदायिनी ॥७५॥
कमलस्था कलामाला कमलास्या क्वणत्प्रभा ।
ककुद्मिनी कष्टवती करणीयकथार्चिता ॥७६॥
कचार्चिता कचतनुः कचसुन्दरधारिणी ।
कठोरकुचसंलग्ना कटिसूत्रविराजिता ॥७७॥
कर्णभक्षप्रिया कन्दा कथाकन्दगतिः कलिः ।
कलिघ्नी कलिदूती च कविनायक-पूजिता ॥७८॥
कणाकक्षानियन्त्री च कश्चित्कविवरार्चिता ।
कर्त्री च कर्तृकाभूषा करिणीकर्णशत्रुपा ॥७९॥
करणेशी करणपा कलवाचा कलानिधिः ।
कलना कलनाधारा कलनाकारिकाकरी ॥८०॥
कलगेया कर्कराशिः कर्कराशि-प्रपूजिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्याराशिः कन्यका च कन्यकाप्रियभाषिणी ॥८१॥
कन्यकादानसन्तुष्टा कन्यकादानतोषिणी ।
कन्यादानकरानन्दा कन्यादानग्रहेष्टदा ॥८२॥
कर्षणा कक्षदहना कामिता कमलासना ।
करमालानन्दकर्त्री करमालाप्रपोषिता ॥८३ ॥
करमालाशयानन्दा करमालासमागमा ।
करमालासिद्धिदात्री करमालाकरप्रिया ॥८४॥
करप्रियाकररता करदानपरायणा ।
कलानन्दा कलिगतिः कलिपूज्या करिप्रसूः ॥८५॥
कलनादनिनादस्था कलनादवरप्रदा ।
कलनादसमाजस्था कहोला च कहोलदा ॥८६॥
कहोलगेहमध्यस्था कहोलवरदायिनी ।
कहोलकविताधारा कहोलऋषिमानिता ॥८७॥
कहोलमानसाराध्या कहोलवाक्यकारिणी ।
कर्त्तृरूपा कर्त्तृमयी कर्त्तृमाता च कर्त्तरी ॥८८॥
कनीया कनकाराध्या कनीनकमयी तथा ।
कनीयानन्दनिलया कनकानन्दतोषिता ॥८९॥
कनीयककराकाष्ठा कथार्णवकरीकरी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिगम्या करिगतिः करिध्वजपरायणा ॥६०॥
करिनाथप्रियाकण्ठा कथानकप्रतोषिता ।
कमनीया कमनका कमनीयविभूषणा ॥६१॥
कमनीयसमाजस्था कमनीयव्रतप्रिया ।
कमनीयगुणाराध्या कपिला कपिलेश्वरी ॥६२॥
कपिलाराध्यहृदया कपिला प्रियवादिनी ।
कहचक्रमन्त्रवर्णा कहचक्रप्रसूनका ॥६३॥
कएईल्ह्रींस्वरूपा च कएईल्ह्रींवरप्रदा ।
कएईल्ह्रींसिद्धिदात्री कएईल्ह्रींस्वरूपिणी ॥६४॥
कएईल्ह्रींमन्त्रवर्णा कएईल्ह्रींप्रसूकला ।
कवर्गा च कपाटस्था कपाटोद्घाटनक्षमा ॥६५॥
कङ्काली च कपाली च कङ्कालप्रियभाषिणी ।
कङ्कालभैरवाराध्या कङ्कालमानसंस्थिता ॥६६॥
कङ्कालमोहनिरता कङ्कालमोहदायिनी ।
कलुषघ्नी कलुषहा कलुषार्त्तिविनाशिनी ॥६७॥
कलिपुष्पा कलादाना कशिपुः कश्यपार्चिता ।
कश्यपा कश्यपाराध्या कलिपूर्णकलेवरा ॥६८॥
कलेवरकरीकाञ्ची कवर्गा च करालका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करालभैरवाराध्या करालभैरवेश्वरी ॥९९॥
कराला कलनाधारा कपर्दीशवरप्रदा ।
कपर्दीशप्रेमलता कपर्दिमालिकायुता ॥१००॥
कपर्दिजपमालाढ्या करवीरप्रसूनदा ।
करवीरप्रियप्राणा करवीरप्रपूजिता ॥१०१॥
कर्णिकारसमाकारा कर्णिकारप्रपूजिता ।
करिषाग्निस्थिता कर्षा कर्षमात्रसुवर्णदा ॥१०२॥
कलशा कलशाराध्या कषाया करिगानदा ।
कपिला कलकण्ठी च कलिकल्पलता मता ॥१०३॥
कल्पलता कल्पमाता कल्पकारी च कल्पभूः ।
कर्पूरामोदरुचिरा कर्पूरामोदधारिणी ॥१०४॥
कर्पूरमालाभरणा कर्पूरवासपूर्त्तिदा ।
कर्पूरमालाजयदा कर्पूरार्णवमध्यगा ॥१०५॥
कर्पूरतर्पणरता कपटेश्वररूपिणी ।
कपटेश्वरसम्पूज्या कपटेश्वररूपिणी ॥१०६॥
कटुःकपिध्वजाराध्या कलापपुष्पधारिणी ।
कलापपुष्परुचिरा कलापपुष्पपूजिता ॥१०७॥
क्रकचा क्रकचाराध्या कथम्ब्रूमा करालता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंकारविनिर्मुक्ता कालीकालक्रियाक्रतुः ॥१०८॥
कामिनो कामिनोपूज्या कामिनीपुष्पधारिणी ।
कामिनीपुष्पनिलया कामिनीपुष्पपूर्णिमा ॥१०९॥
कामिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा ।
कामिनीपुष्पतिलका कामिनीकुण्डचुम्बना ॥११०॥
कामिनीयोगसन्तुष्टा कामिनीयोगभोगदा ।
कामिनीकुण्डसम्भग्ना कामिनीकुण्डमध्यगा ॥१११॥
कामिनीमानसाराध्या कामिनीमानतोषिता ।
कामिनीमानसंचारा कालिका कालकालिका ॥११२॥
कामा च कामदेवी च कामेशी कामसम्भवा ।
कामभावा कामरता कामार्त्ता काममञ्जरी ॥११३॥
काममंजीररणिता कामदेवप्रियान्तरा ।
कामकालो कामकला कालिका कमलार्चिता ॥११४॥
कादिका कमला काली कालानलसमप्रभा ।
कल्पान्तदहना कान्ता कान्तारप्रियवासिनी ॥११५॥
कालपूज्या कालरता कालमाता च कालिनी ।
कालवीरा कालघोरा कालसिद्धा च कालदा ॥११६॥
कालांजनसमाकारा कालंजरनिवासिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालऋद्धिः कालवृद्धिः कारागृहविमोचिनी ॥११७॥
कादिविद्या कादिमाता कादिस्था कादिसुन्दरी ।
काशी कांची च कांचीशा काशीशवरदायिनी ॥११८॥
क्रींम्बीजा चैव क्राम्बीजा हृदयायनमस्मृता ।
काम्या काम्यगतिःकाम्यसिद्धिदात्री च कामभूः।११६
कामाख्या कामरूपा च कामचापविमोचिनी ।
कामदेवकलारामा कामदेवकलालया ॥१२०॥
कामरात्रिः कामदात्री कान्ताराचलवासिनी ।
कामरूपा कालगतिः कामयोगपरायणा ॥१२१॥
कामसम्मर्दनरता कामगेहविकाशिनी ।
कालभैरवभार्य्या च कालभैरवकामिनी ॥१२२॥
कालभैरवयोगस्था कालभैरवभोगदा ।
कामधेनुः कामदोग्ध्री काममाता च कान्तिदा ।१२३।
कामुका कामुकाराध्या कामुकानन्दवर्द्धिनी ।
कार्त्तवीर्य्या कार्त्तिकेया कार्त्तिकेयप्रपूजिता ॥१२४॥
कार्या कारणदा-कार्य्यकारिणी कारणान्तरा ।
कांतिगम्या कांतिमयी कात्या कात्यायनी च का ।१२५
कामसारा च काश्मीरा काश्मीराचारतत्परा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामरूपाचाररता कामरूपप्रियम्बदा ॥१२६॥
कामरूपाचोरसिद्धिः कामरूपमनोमयी ।
कार्त्तिकी कार्त्तिकाराध्या कांचनारप्रसूनभूः ॥१२७॥
कांचनारप्रसूनाभा कांचनारप्रपूजिता ।
कांचरूपा कांचभूमिः कांस्यपात्रप्रभोजिनी ॥१२८॥
कांस्यध्वनिमयी काम-सुन्दरीकामचुम्बना ।
काशपुष्पप्रतीकाशा कामद्रुमसमागमा ॥१२९॥
कामपुष्पा कामभूमिः कामपूज्या च कामदा ।
कामदेहा कामगेहा कामवीजपरायणा ॥१३०॥
कामध्वजसमारूढा कामध्वजसमास्थिता ।
काश्यपो काश्यपाराध्या काश्यपानन्ददायिनी ॥१३१॥
कालिन्दीजलसङ्काशा कालिन्दीजलपूजिता ।
कादेवपूजानिरता कादेवपरमार्थदा ॥१३२॥
कार्म्मणा कार्म्मणाकारा कामकार्म्मणाकारिणी ।
कार्म्मणात्रोटनकरी कालिनीकारणाह्वया ॥१३३॥
काव्यामृता च कालिङ्गा कालिङ्गमर्दनोद्यता ।
कालागुरुविभूषाढ्या कालागुरुविभूतिदा ॥१३४॥
कालागुरुसुगन्धा च कालागुरुप्रतर्पणा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालबुद्धिः कालवृद्धिः कारागृहविमोचिनी ॥११७॥
कादिविद्या कादिमाता कादिस्था कादिसुन्दरी ।
काशी कांची च कांचीशा काशीशवरदायिनी ॥११८॥
क्रींबीजा चैव क्रांबीजा हृदयायनमस्मृता ।
काम्या काम्यगतिःकाम्यसिद्धिदात्री च कामभूः ॥११९
कामाख्या कामरूपा च कामचापविमोचिनी ।
कामदेवकलारामा कामदेवकलालया ॥१२०॥
कामरात्रिः कामदात्री कान्ताराचलवासिनी ।
कामरूपा कालगतिः कामयोगपरायणा ॥१२१॥
कामसम्मर्दनरता कामगेहविकाशिनी ।
कालभैरवभार्य्या च कालभैरवकामिनी ॥१२२॥
कालभैरवयोगस्था कालभैरवभोगदा ।
कामधेनुः कामदोग्ध्री काममाता च कान्तिदा ।१२३।
कामुका कामुकाराध्या कामुकानन्दवर्द्धिनी ।
कार्त्तवीर्य्या कार्त्तिकेया कार्त्तिकेयप्रपूजिता ॥१२४॥
कार्या कारणदा-कार्य्यकारिणी कारणान्तरा ।
कांतिगम्या कांतिमयी कात्या कात्यायनी च का ।१२
कामसारा च काश्मीरा काश्मीराचारतत्परा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामरूपाचाररता कामरूपप्रियम्बदा ॥१२६॥
कामरूपाचोरसिद्धिः कामरूपमनोमयी ।
कार्त्तिकी कार्त्तिकाराध्या कांचनारप्रसूनभूः ॥१२७॥
कांचनारप्रसूनाभा कांचनारप्रपूजिता ।
कांचरूपा कांचभूमिः कांस्यपात्रप्रभोजिनी ॥१२८॥
कांस्यध्वनिमयी काम-सुन्दरीकामचुम्बना ।
काशपुष्पप्रतीकाशा कामद्रुमसमागमा ॥१२९॥
कामपुष्पा कामभूमिः कामपूज्या च कामदा ।
कामदेहा कामगेहा कामवीजपरायणा ॥१३०॥
कामध्वजसमारूढा कामध्वजसमास्थिता ।
काश्यपी काश्यपाराध्या काश्यपानन्ददायिनी ॥१३१॥
कालिन्दीजलसङ्काशा कालिन्दीजलपूजिता ।
कादेवपूजानिरता कादेवपरमार्थदा ॥१३२॥
कार्म्मणा कार्म्मणाकारा कामकार्म्मणकारिणी ।
कार्म्मणत्रोटनकरी कालिनीकारणाह्वया ॥१३३॥
काव्यामृता च कालिङ्गा कालिङ्गमर्द्दनोद्यता ।
कालागुरुविभूषाढ्या कालागुरुविभूतिदा ॥१३४॥
कालागुरुसुगन्धा च कालागुरुप्रतर्पणा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कावेरीनीरसम्प्रीता कावेरीतीरवासिनी ॥१३५॥
कालचक्रभ्रमाकारा कालचक्रनिवासिनी ।
कानना काननाधारा कारुः कारुणिकामयी ॥१३६॥
काम्पिल्यवासिनी काष्ठा कामपत्नी च कामभूः ।
कादम्बरीपानरता तथा कादम्बरीकला ॥१३७॥
काकवन्ध्या च कामेशी कामराजप्रपूजिता ।
कामराजेश्वरीविद्या कामकौतुकसुन्दरी ॥१३८॥
काम्बोजजा काञ्चिनदा कांस्यकाञ्चनकारिणी ।
कांचनाद्रिसमाकारा काञ्चनाद्रिप्रदानदा ॥१३ ॥
कामकीर्त्तिः कामकेशी कारिका कान्तराश्रया ।
कामभेदी च कामार्ति-नाशिनी कामभूमिका ॥१४०॥
कालानिर्णाशिनी काव्यवनिता कामरूपिणी ।
कायस्था कामसन्दीप्तिः काव्यदा कालसुन्दरी ।१४१।
कामेशी कारणवरा कामेशीपूजनोद्यता ।
काञ्ची-नूपुरभूषाढ्या कुङ्कुमाभरणान्विता ।१४२॥
कालचक्रा कालगतिः कालचक्रमनोभवा ।
कुन्दमध्या कुन्दपुष्पा कुन्दपुष्पप्रियाकुजा ॥१४३॥
कुजमाता कुजाराध्या कुठारवरधारिणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुञ्जरस्था कुशरता कुशेशयविलोचना ॥१४४॥
कुनठी कुररी कुद्रा कुरङ्गी कुटजाश्रया ।
कुम्भीनस-विभूषा च कुम्भीनस-वधोद्यता ॥१४५॥
कुम्भकर्णमनोल्लासा कुलचूडामणिः कुला ।
कुलालगृहकन्या च कुलचूडामणिप्रिया ॥१४६॥
कुलपूज्या कुलाराध्या कुलपूजापरायणा ।
कुलभूषा तथा कुक्षिः कुररीगणसेविता ॥१४७॥
कुलपुष्पा कुलरता कुलपुष्पपरायणा ।
कुलवस्त्रा कुलाराध्या कुलकुण्डसमप्रभा ॥१४८॥
कुलकुण्डसमोल्लासा कुण्डपुष्पपरायणा ।
कुण्डपुष्पप्रसन्नास्या कुण्डगोलोद्भवात्मिका॥१४९॥
कुण्डगोलोद्भवाधारा कुण्डगोलमयी कुहूः ।
कुण्डगोलप्रियप्राणा कुण्डगोलप्रपूजिता ॥१५०॥
कुण्डगोलमनोल्लासा कुण्डगोलबलप्रदा ।
कुण्डदेवरता क्रुद्धा कुलसिद्धिकरापरा ॥१५१॥
कुलकुण्डसमाकारा कुलकुण्डसमानभूः ।
कुण्डसिद्धिः कुण्डऋद्धिः कुमारीपूजनोद्यता १५२।
कुमारीपूजकप्राणा कुमारीपूजकालया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमारीकामसन्तुष्टा कुमारीपूजकोत्सुका ॥१५३॥
कुमारीव्रतसन्तुष्टा कुमारीरूपधारिणी ।
कुमारीभोजनप्रीता कुमारी च कुमारदा ॥१५४॥
कुमारमाता कुलदा कुलयोनिः कुलेश्वरी ।
कुललिङ्गा कुलानन्दा कुलरम्या कुतर्कधृक् ॥१५५।
कुन्ती च कुलकान्ता च कुलमार्गपरायणा ।
कुल्ला च कुरुकुल्ला च कुल्लुका कुलकामदा ॥१५६॥
कुलिशाङ्गी कुब्जिका च कुब्जिकानन्दवर्द्धिनी ।
कुलीना कुञ्जरगतिः कुञ्जरेश्वरगामिनी ॥१५७॥
कुलपाली कुलवती तथैव कुलदीपिका ।
कुलयोगेश्वरी कुण्डा कुंकुमारुणविग्रहा ॥१५८॥
कुंकुमानन्दसन्तोषा कुंकुमार्णववासिनी ।
कुसुमा कुसुमप्रीता कुलभूः कुलसुन्दरी ॥१५९॥
कुमुद्वती कुमुदिनी कुशला कुलटालया ।
कुलटालयमध्यस्था कुलटासङ्गतोषिता ॥१६०॥
कुलटाभवनोद्युक्ता कुशावर्त्ता कुलार्णवा ।
कुलार्णवाचाररता कुण्डली कुण्डलाकृतिः ॥१६१॥
कुमती च कुलश्रेष्ठा कुलचक्रपरायणा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कूटस्था कूटदृष्टिश्च कुन्तला कुन्तलाकृतिः ॥१६२॥
कुशलाकृतिरूपा च कूर्च्चबीजधरा च कूः ।
कंकुंकुंकुंशब्दरता क्रूंक्रूंक्रूंक्रूम्परायणा ॥१६३॥
कुंकुंकुंशब्दनिलया कुक्कुरालयवासिनी ।
कुक्कुरासङ्गसंयुक्ता कुक्कुरानन्तविग्रहा ॥१६४॥
कूर्च्चारम्भा कूर्च्चबीजा कूर्च्चजापपरायणा ।
कुचस्पर्शनसन्तुष्टा कुचालिङ्गनहर्षदा ॥१६५॥
कुगतिघ्नी कुबेरार्च्या कुचभूः कुलनायिका ।
कुगायना कुचधरा कुमाता कुंददन्तिनी ॥१६६॥
कुगेया कुहराभासा कुगेया कुघ्नदारिका ।
कीर्त्तिःकिरातिनीक्लिन्नाकिन्नराकिन्नरीक्रिया १६७
क्रींङ्कारा क्रोंजपासक्ता क्रींहूंस्त्रींमंत्ररूपिणी ।
किर्म्मीरितदृशापाङ्गी किशोरी च किरीटिनी ॥१६८॥
कीटभाषा कीटयोनिः कीटमाता च कीटदा ।
किंशुका कीरभाषा च क्रियासारा क्रियावती ॥१६९॥
कींकींशब्दपरा क्लींक्लींक्लूंक्लैंक्लौंमंत्ररूपिणी ।
कांकींकूंकैंस्वरूपा च कःफट्मन्त्रस्वरूपिणी ॥१७०॥
केतकीभूषणानन्दा केतकीभरणान्विता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्तिका कृष्णवर्णा च कृष्णकृत्या क्रियातुरा ॥१८०॥
कृशाङ्गी कृतकृत्या च क्रः फट्स्वाहास्वरूपिणी ।
क्रौंक्रौंहूँफट्मन्त्रवर्णा क्रींह्रींह्रूं फट्स्वरूपिणी ॥१८१॥
क्रींक्रींह्रींह्रीं तथा ह्रूंह्रूँफट्स्वाहामन्त्ररूपिणी ।
इति श्रीसर्वसाम्राज्यमेधा-नामसहस्रकम् ॥१८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैकदा केशिनी केशी केशीसूदनतत्परा ॥१७१॥
केशरूपा केशमुक्ता कैकेयी कौशिकी तथा।
कैरवा कैरवाह्लादा केशरा केतुरूपिणी ॥१७२॥
केशवाराध्यहृदया केशवासक्तमानसा।
क्लैव्यविनाशिनी क्लैञ्च क्लैंबीजजपतोषिता १७३
कौशल्या कोशलाक्षी च कोशाच कमला तथा।
कोलापुरनिवासा च कोलासुरविनाशिनी ॥१७४॥
कोटिरूपा कोटिरता क्रोधिनी क्रोधरूपिणी।
केका च कोकिला कोटिः कोटिमन्त्रपरायणा ॥१७५॥
कोट्यनन्तमन्त्रयुता कैरूपा केरलाश्रया।
केरलाचारनिपुणा केरलेन्द्रगृहस्थिता ॥१७६॥
केदाराश्रमसंस्था च केदारेश्वरपूजिता।
क्रोधरूपा क्रोधपदा क्रोधमाता च कौशिकी ॥१७७॥
कोदण्डधारिणी क्रौंचा कौशिक्या कौलमार्गगा।
कौलिनी कौलिकाराध्या कौलिकागारवासिनी ।१७८
कौतुकी कौमुदी कौला कुमारी कौरवार्चिता।
कौण्डिन्या कौशिकी क्रोधा ज्वालाभासुररूपिणी १७९
कोटिकालानलज्वाला कोटिमार्त्तण्डविग्रहा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्पूरस्तोत्र पाठके पहले आवश्यक विनियोगादि

ओं अस्य कर्पूरस्तवराजस्य महाकाल ऋषिः, गायत्री छन्दः, श्रीदक्षिणाकालिका देवता, हलो वीजानि, स्वराः शक्तयः, अव्यक्तं कीलकं, श्रीदक्षिणाकालिकादेवताप्रसादसिद्ध्यर्थं अमुककामनासिद्ध्ये जपे विनियोगः ।

ऋष्यादिन्यासः

महाकालऋषये नमः शिरसि – अङ्गुष्ठसे
गायत्रीछन्दसे नमो मुखे—मध्यमा-अनामिका से
श्रीदक्षिणाकालिकादेवताय नमो हृदि—तर्जनी-मध्यमा से
हलभ्यो वीजेभ्यो नमो गुह्ये—अङ्गुष्ठ-अनामिका से
स्वरेभ्यः शक्तिभ्यो नमः पादयोः—मध्यमा से
अव्यक्ताय कीलकाय नमः सर्वाङ्गे—दोनों हस्ततलों से

करन्यास :—

क्रां अङ्गुष्ठाभ्यां नमः, क्रीं तर्जनीभ्यां स्वाहा, क्रूं मध्यमाभ्यां वषट्, क्रैं अनामिकाभ्यां हूम्, क्रौं कनिष्ठाभ्यां वौषट्, क्रः करतलकरपृष्ठाभ्यां फट् ।

अङ्गन्यास :—

क्रां हृदयाय नमः, क्रीं शिरसे स्वाहा, क्रूं शिखायै वषट्, क्रैं कवचाय हुम्, क्रौं नेत्रत्रयाय वौषट्, क्रः अस्त्राय फट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताराराधना

ध्यानम् —

प्रत्यालीढपदार्पितां घ्रिशवहृद्घोराट्टहासापरा ।
खड्गेन्दीवरकर्त्रिखर्परभुजा हुङ्कारबीजोद्भवा ॥
खर्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता ।
जाड्यं न्यस्य कपालकर्तृ जगतां हन्त्युग्रतारा स्वयम् ॥

मन्त्र :—

ओं ह्रीं स्त्रीं हूं फट्

श्रीताराष्टकम्

श्रीभैरव उवाच

ॐ मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे ।
प्रत्यालीढपदस्थिते शिवहृदि स्मेराननाम्भोरुहे ॥
फुल्लेन्दीवरलोचनत्रययुते कर्त्रीकपालोत्पले ।
खड्गञ्चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ॥
वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धीश्वरि ।
गद्यप्राकृतपद्यजातरचनासर्वज्ञसिद्धिप्रदे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रीमिन्दीवरलोचनत्रययुते कारुण्यधारां निधे ।
सौभाग्यामृतवर्षणेन कृपया सिंचत्वमस्मादृशम् ॥
खर्वे गर्वसमूहपूरिततनो सर्पादिवेशोज्ज्वले ।
व्याघ्रत्वक्परिवीतसुन्दरकटि व्याधूतघण्टाङ्किते ॥
सद्यःकृत्तगलद्रजःपरिमिलन्मुण्डद्वयी मूर्द्धज—
ग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भयं नाशय ॥
मायानङ्गविकाररूपललनाबिन्द्वर्धचन्द्रात्मिके ।
हुँ फट्कारमयि त्वमेव शरणं मन्त्रात्मिके मादृशः ॥
मूर्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा ।
वेदानां नहि गोचरा कथमपि प्राप्तां नु तामाश्रये ॥
त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां ।
तस्य श्रीपरमेश्वरत्रिनयनब्रह्मादिसाम्यात्मनः ॥
संसाराम्बुधिमज्जने पटुतनूम् देवेन्द्रमुख्यान् सुरान् ।
मातस्त्वत्पदसेवने हि विमुखान् को मन्दधीः सेवते ॥
मातस्त्वत्पदपङ्कजद्वयरजोमुद्राङ्ककोटीरिणा—
स्ते देवा जयसंगरे विजयिनो निःशंकमंके गताः ॥
देवोऽहं भुवने न मे सम इति स्पर्द्धां वहन्तः परा—
स्तत्तुल्यान्नियतं तथाऽसुभिरमी नाशं व्रजन्ति स्वयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वन्नामस्मरणात्पलायनपरा द्रष्टुं च शक्ता न ते ।
भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः ॥
दैत्या दानवपुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो ।
डाकिन्यः कुपितान्तकश्च मनुजो मातः क्षणं भूतले ॥
लक्ष्मीः सिद्धिगणाश्च पादुकमुखाःसिद्धास्तथा वैरिणां
स्तम्भश्चापि वराङ्गने गजघटास्तम्भस्तथा मोहनम् ॥
मातस्त्वत्पदसेवया खलु नृणां सिध्यन्ति ते ते गुणाः ।
क्लान्तः कान्तमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः॥
ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः ।
प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ।
लभते कवितां विद्यां सर्वशास्त्रार्थविद् भवेत् ।
लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥
कीर्तिं कान्तिं च नैरुज्यं प्राप्यान्ते मोक्षमाप्नुयात् ॥

इति नीलतन्त्रे श्रीताराष्टकं स्तोत्रं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इच्छापूरिणी स्तोत्रम्

इच्छापूरिणि मातः सर्वं पूरय ममाभीष्टम् ।
त्वन्नामान्वर्थतया त्वयि प्रतीतिर्यथा मे स्यात् ॥१॥
करुणापारावारस्तव नयनेकोऽपि लसतितराम् ।
यद्वीक्षणकणिकातः स्पृष्टो लभते जनः श्रेयः ॥२॥
अयि करुणामयि मय्यपि सा संख्या सदुपमाधेया
गण्यन्ते त्वत्करुणावर्द्धितविभवा यया लोके ॥३॥
मातस्त्वमस्यनन्तानन्तं विभवं प्रयच्छ मह्यमपि ।
येन मदीयं दैन्यं दूरतरं स्याद्यथा शीघ्रम् ॥४॥
भवतीव्रतापदलने भवती व्रतमद्य यद्धृत्ते ।
दृढविश्वस्तमनस्त्वाच्छरणं करवाणि तव चरणौ ॥५॥
जनि प्रतीतिरन्तरमध्यास्ते मम सदा भवती ।
स्खलितत्वत्पदपूजो गच्छन् गेहं बलाद्रुद्धः ॥६॥
त्वमसि निखिलजनजननी सुतसामान्यं वितर मे स्नेहम्
कल्याणकल्पलतिके गतिस्त्वमेका ममासि भुवि ॥७॥
अर्चार्पितमालायां ग्रथितान्यभिलाषकुसुमानि ।
फलन्त्वनुग्रहस्तव किमतः परमम्ब कथयानि ॥८॥
दैन्यग्राहाक्रान्तो दारिद्र्याब्धौ निमज्जमानोऽस्मि ।
कृष्णन्ती त्वं द्राक्तर मुद्धर मां मा कुरु विलम्बम् ॥९॥
नवभिः कुसुमैर्ग्रथिता समर्पिता तव चरणयुगले ।
अपनयतु ममाभावं सकलं शीघ्रं विभवपुञ्जैः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीबगलाराधना ॥

ध्यानानि

(१) पीताम्बरालंकृतपीतवर्णां,
सप्तोदरीं सर्वमुखामरार्चिताम् ।
पीताम्बरालंकृतपीतपुष्पां,
स्मरे सदाहं बगलामुखीं हृदि ॥

(२) कौलागमैकसंवेद्यां सदा कौलावलम्बिकाम्,
भजेऽहंसर्वसिद्ध्यर्थं बगलां चिन्मयीं हृदि ॥

(३) पीतवर्णां मदाघूर्णां दृढपीनपयोधराम् ॥
बन्देऽहं बगलां देवीं स्तम्भनास्त्रस्वरूपिणीम् ॥

(४) नमस्ते बगलां देवीं जिह्वास्तम्भनकारिणीम् ॥
भजेऽहं शत्रुनाशार्थं मदिरासक्तमानसाम् ॥

(५) अम्बां पीताम्बराढ्यामरुणकुसुम
गन्धानुलेपां त्रिनेत्राम्
गंभीरां कम्बुकण्ठीं कठिनकुचयुगां
चारुबिम्बाधरोष्ठीम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत्रोर्जिह्वां च खड्गं शरधनुसहितां
व्यक्तगर्वाधिरूढां
देवीं तां स्तम्भरूपां हृदि परिवसनामम्बिकां
संस्मरामि ॥

(७) योषिदाकर्षणे शक्तां फुल्लचम्पकसन्निभाम् ।
दुष्टसंस्तम्भना सक्तां बगलां स्तम्भिनीं भजे ॥

मन्त्रः —

ओं ह्ल्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्ल्रीं ओं स्वाहा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१—कवचम्

भैरव्युवाच—

श्रुत्वा च बगलापूजां स्त्रोत्रं चापि महेश्वर ।
इदानीं श्रोतुमिच्छामि कवचं वद मे प्रभो ॥
वैरिनाशकरं दिव्यं सर्वाशुभविनाशनम् ।
शुभदं स्मरणात्पुण्यं त्राहि मां दुःखनाशन ॥

श्रीभैरव उवाच—

कवचं शृणु वक्ष्यामि भैरवि प्राणवल्लभे ।
पठित्वा धारयित्वा च त्रैलोक्ये विजयी भवेत् ॥

ॐ अस्य श्रीबगलामुखीकवचस्य नारदऋषिः अनुष्टुप् छन्दः श्रीबगलामुखी देवता लं बीजं ईं शक्तिः ऐं कीलकम् पुरुषार्थचतुष्टयप्राप्तये जपे विनियोगः ।

शिरो मे बगला पातु हृदयैकाक्षरी परा ।
ॐ ह्रीं ॐ मे ललाटे च बगला वैरिनाशिनी ॥
गदाहस्ता सदा पातु मुखं मे मोक्षदायिनी ।
वैरिजिह्वाधरा पातु कण्ठं मे बगलामुखी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदरं नाभिदेशं च पातु नित्यं परात्परा ।
परात्परतरा पातु मम गुह्यं सुरेश्वरी ॥
हस्तौ चैव तथा पादौ पार्वती परिपातु मे ।
विवादे विषमे घोरे संग्रामे रिपुसङ्कटे ॥
पीताम्बरधरा पातु सर्वाङ्गं शिवनर्तकी ।
श्रीविद्या समयां पातु मातङ्गी पूजिता शिवा ॥
पातु पुत्रं सुतां चैव कलत्रं कालिका मम ।
भ्रातरं पातु नित्यं मे पितरं शूलिनी सदा ॥
रन्ध्रे हि बगलादेव्याः कवचं मन्मुखोदितम् ।
नैव देयममुख्याय सर्वसिद्धिप्रदायकम् ॥
पठनाद् धारणादस्य पूजनाद् वाञ्छितं लभेत् ।
इदं कवचमज्ञात्वा यो जपेद् बगलामुखीम् ॥
पिबन्ति शोणितं तस्य योगिन्यः प्राप्य सादराः
वश्ये चाकर्षणे चैव मारणे मोहने तथा ॥
महाभये विपत्तौ च पठेद् वा पाठयेत्तु यः ।
तस्य सर्वार्थसिद्धिः स्याद् भक्तियुक्तस्य पार्वति ॥

॥ इति श्रीरुद्रयामले श्रीबगलामुखीकवचम् सम्पूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२—"अथ कवचम्"

कैलासाचलमध्यगं पुरवहं
शान्तं त्रिनेत्रं शिवम्,
वामस्था कवचं प्रणम्य गिरिजा
भूतिप्रदं पृच्छति।
देवी श्रीबगलामुखी रिपुकुला-
रण्याग्निरूपा च या,
तस्याश्चापविमुक्तमन्त्रसहितं
प्रीत्याधुना ब्रूहि माम् ॥१॥

श्रीशङ्कर उवाच—

देवि श्रीभववल्लभे शृणु महामन्त्रं
विभूतिप्रदम्।
देव्या वर्मयुतं समस्तसुखदं,
साम्राज्यदं मुक्तिदम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तारंरुद्रवधूविरञ्चिमहिला-
विष्णुप्रिया कामयुक्,
कान्ते श्रीबगलानने मम रिपुं
नाशाय युग्मंत्विति ॥२॥
ऐश्वर्याणि पदं च देहि युगलं
शीघ्रं मनोवाञ्छितम् ,
कार्यं साधय युग्मयुक्शिववधू-
र्वह्निप्रियान्तो मनुः ॥
कंसारेस्तनयं च बीजमपरा
शक्तिश्च वाणी तथा ।
कीलं श्रीमति भैरवर्षिसहितं
छन्दोविराट्संयुतम् ॥३॥
स्वेष्टार्थस्य परस्य वेति नितरां
कार्यस्य संप्राप्तये ।
नानाऽसाध्य महामदस्य नियतं
नाशाय वीर्याप्तये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यात्वा श्रीबगलाननां मनुवरं
जप्त्वा सहस्राख्यकम् ।
दीर्घैः षट्कयुतैश्च रुद्रमहिता
वीजैं विनश्याङ्कगे ॥४॥

ध्यानम्—

सौवर्णासनसंस्थितां त्रिनयनां
पीतांशुकोल्लासिनीम् ।
हेमाभाङ्गरुचिं शशाङ्कमुकुटां
सच्चम्पकस्रग्युताम् ॥
हस्तैर्मुद्गरपाशवज्ररसनां
संबिभ्रतीं भूषण-
व्याप्ताङ्गीं बगलामुखीं त्रिजगतां
संस्तम्भिनीं चिन्तये ॥५॥

ॐ अस्य श्रीवगलामुखीब्रह्मास्त्रमन्त्र कवचस्य भैरव-ऋषि विराट् छन्दः श्रीबगलामुखी देवता, क्लीं बीजम्, ऐं शक्तिः, श्रीं कीलकं मम परस्य च मनोऽभिलषितेष्ट कार्यसिद्धये विनियोगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरसि भैरवऋषये नमः, मुखे विराट्छन्दसे नमः, हृदि बगलामुखीदेवतायै नमः, गुह्ये क्लीं बीजाय नमः, पादयोः ऐं शक्तये नमः, सर्वाङ्गे श्रीं कीलकाय नमः ॥

ओं ह्रां अङ्गुष्ठाभ्यां नमः, ओं ह्रीं तर्जनीभ्यां नमः, ओं ह्रूं मध्यमाभ्यां नमः, ओं ह्रैं अनामिकाभ्यां नमः, ओं ह्रौं कनिष्टकाभ्यां नमः, ओं ह्रः करतलकरपृष्ठाभ्यां नमः ॥

ओं ह्रां हृदयाय नमः, ओं ह्रीं शिरसे स्वाहा, ओं ह्रूं शिखायै वषट्, ओं ह्रैं कवचाय हुम्, ओं ह्रौं नेत्रत्रयाय वौषट्, ओं ह्रः अस्त्राय फट् ॥

मन्त्रोद्धार :—

ओं ह्रीं ऐं श्रीं क्लीं श्रीबगलानने मम रिपून् नाशय नाशय ममैश्वर्याणि देहि देहि शीघ्रं मनोवाञ्छितं कार्यं साधय साधय ह्रीं स्वाहा ॥

शिरो मे पातु ओं ह्रीं ऐं श्रीं क्लीं
पातु ललाटकम् ॥
सम्बोधनपदं पातु नेत्रे श्रीबगलानने ॥१॥
श्रुतौ मम रिपुं पातु नासिकां नाशय द्वयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातु गण्डौ सदा मामैश्वर्याण्यन्तन्तु मस्तकम् ॥
देहि द्वन्द्वं सदा जिह्वां पातु शीघ्रं बचो मम ॥
कण्ठदेशं स नः पातु वाञ्छितं बांहुमूलकम् ॥
कार्यं साधय द्वन्द्वं तु करौ पातु सदा मम ॥
मायायुक्ता तथा स्वाहा हृदयं पातु सर्वदा ॥
अष्टाधिकचत्वारिंशदण्डाढ्या बगलामुखी ॥
रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा मम ॥
ब्रह्मास्त्राख्यो मनुः पातु सर्वाङ्गं सर्वसन्धिषु ।
मन्त्रराजः सदा रक्षाङ्करोतु मम सर्वदा ॥
ओं ह्लीं पातु नाभिदेशं कटिं मे बगलावतु ।
मुखीवर्णद्वयं पातु लिङ्गं मे मुष्कयुग्मकम् ॥
जानुनी सर्वदुष्टानां पातु मे वर्णपञ्चकम् ॥
वाचं मुखं तथा पादं षड्वर्णा परमेश्वरी ॥
जङ्घायुग्मं सदापातु बगला रिपुमोहिनी ।
स्तम्भयेति पदं पृष्ठं पातु बर्णत्रयं मम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिह्वां वर्णद्वयं पातु गुल्फौ मे कीलयेति च ।
पादोर्द्ध्वं सर्वदा पातु बुद्धिं पादतले मम ॥
विनाशय पदं पातु पदाङ्गुल्योर्नखानि मे ।
ह्रीं बीजं सर्वदा पातु बुद्धीन्द्रियबचांसि मे ॥
सर्वाङ्गं प्रणवः पातु स्वाहा रोमाणि मेऽवतु ।
ब्राह्मी पूर्वदले पातु चाग्नेय्यां विष्णुवल्लभा ॥
माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽबतु ।
कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥
बाराही चोत्तरे पातु नारसिंही शिवेऽवतु ।
ऊर्द्ध्वं पातु महालक्ष्मीः पाताले शरदाऽवतु ॥
इत्यष्टौ शक्तयःपातु सायुधाश्च सवाहनाः ।
राजद्वारे महादुर्गे पातु मां गणनायकः ॥
श्मशाने जलमध्ये च भैरवश्च सदाऽवतु ।
द्विभुजा रक्तवसनाः सर्वाभरणभूषिताः ॥
योगिन्यः सर्वदा पान्तु महारण्ये सदा मम ।
इति ते कथितं देवि कवचं परमाद्भुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री विश्वविजयं नाम कीर्तिश्रीविजयप्रदम् ।
अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ॥
निर्धनो धनमाप्नोति कवचस्यास्यपाठतः ।
जपित्वा मन्त्रराजं तु ध्यात्वा श्रीबगलामुखीम्
पठेदिदं तु कवचं निशायां नियमात्तु यः ।
यद्‌यत् कामयते कामं साध्यासाध्यं महीतले ॥
तत्काममवाप्नोति सप्तरात्रेण शङ्करि ।
गुरुं ध्यात्वा सुरां पीत्वा रात्रौ शक्तिसमन्वितः
कवचं यः पठेद् देवि तस्या साध्यं न किञ्चन ।
यं ध्यात्वा प्रजपेन् मन्त्रं सहस्रं कवचं पठेत् ॥
त्रिरात्रेण वशं याति मृत्युं तन्नात्र संशयः ।
लिखित्वा प्रतिमां शत्रोः सतालेन हरिद्रया ॥
लिखित्वा हृदितन्नाम तन्ध्यात्वा प्रजपेन्मनुम्
एकविंशदिनं यावत् प्रत्यहं च सहस्रकम् ॥
जप्त्वा पठेत्तु कवचं चतुर्विंशतिबारकम् ।
संस्तम्भं जायते शत्रोर्नात्रकार्याविचारणा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवादे विजयं तस्य संग्रामे जयमाप्नुयात् ।
श्मशाने च भयं नास्ति कवचस्य प्रभावतः ॥
नवनीतञ्चाभिमन्त्र्य स्त्रीणां दद्यान्महेश्वरि ।
बन्ध्यायां जायते पुत्रो विद्याबलसमन्वितः ॥
श्मशानाङ्गारमादाय भौमे रात्रौ शनावथ ।
पादोदकेन स्पृष्ट्वा च लिखेल्लोहशलाकया ॥
भूमौ शत्रोः स्वरूपं च हृदि नाम समालिखेत् ।
हस्तं तद्धृदये दत्त्वा कवचं तिथिवारकम् ॥
ध्यात्वा जपेन्मन्त्रराजं नवरात्रं प्रयत्नतः ।
म्रियते ज्वरदाहेन दशमेऽह्नि न संशयः ॥
भूर्जपत्रेष्विदं स्तोत्रमष्टगन्धेन संलिखेत् ।
धारयेद्दक्षिणे बाहौ नारी बामभुजे तथा ॥
संग्रामे जयमाप्नोति नारी पुत्रवती भवेत् ।
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम्
संपूज्य कवचं नित्यं पूजायाः फलमालभेत् ।
बृहस्पतिसमो वापि विभवे धनदोपमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामतुल्यश्च नारीणां शत्रूणां च यमोपमः ।
कबितालहरी तस्य भवेद्ग गङ्गाप्रवाहवत् ॥
गद्यपद्यमयी वाणी भवेद्ग देवीप्रसादतः ।
एकादशशतं यावत् पुरश्चरणमुच्यते ॥
पुरश्चर्याविहीनं तु न चेदं फलदायकम् ।
न देयं परशिष्येभ्यो दुष्टेभ्यश्च विशेषतः ॥
देयं शिष्याय भक्ताय पञ्चत्वञ्चान्यथाप्नुयात् ।
इदं कवचमज्ञात्वा यो भजेद्बगलामुखीम् ॥
शतकोटि जपित्वा तु तस्य सिद्धिर्न जायते ।
दाराढ्यो मनुजोऽस्य लक्षजपतः
प्राप्नोति सिद्धिं पराम् ॥
विद्यां श्रीविजयन्तथा सुनियतं
धारञ्च वीरं परम् ॥
ब्रह्मास्त्रख्यमनुं विलिख्य नितरां
भुर्जेऽष्टगन्धेन वै ॥
धृत्वा राजपुरं ब्रजन्ति खलु मे
दासोऽस्ति तेषां नृपः ॥

इतिविश्वेश्वरोद्धारतन्त्रे पार्वतासंवादे
बगलामुखीकबचं सम्पूर्ण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"श्री बगलामुखी स्तोत्र"

ॐ अस्य श्रीबगलामुखीस्तोत्रस्य भगवान् नारद ऋषिः श्रीबगलामुखीदेवता त्रिष्टुप्छन्दः मम संनिहितानामसंनिहितानां विरोधिनां दुष्टानां वाङ्मुखबुद्धीनां स्तम्भनार्थे श्रीमहामायाबगलामुखीवरप्रसादसिद्ध्यर्थे जपे विनियोगः।

ॐ ह्लीं अंगुष्ठाभ्यां नमः, ॐ बगलामुखि तर्जनीभ्यां स्वाहा, ॐ सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुम्, ॐ जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ओं बुद्धिं विनाशय ह्लीं ओं स्वाहा करतल करपृष्ठाभ्यां नमः। एवं हृदयादिषु। ध्यानम्—

सौवर्णासनसंस्थितां त्रिनयनां
पीतांशुकोल्लसिनीं,
हेमाभाङ्गरुचिं शशाङ्कमुकुटां
सच्चम्पकस्रग्युताम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तैर्मुद्गरपाशवज्ररसनां

संविभ्रतीं भूषणै—

र्व्याप्ताङ्गीं बगलामुखीं त्रिजगतां

संस्तम्भिनीं चिन्तये ॥

जपमन्त्र-ओं ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ओं स्वाहा

मध्ये सुधाब्धिमणिमण्डपरत्नवेद्यां,

सिंहासनोपरिगतां परिपीतवर्णाम् ।

पीताम्बराभरणमाल्यविभूषितांगीं,

देवीं भजामि धृतमुद्गरवैरिजिह्वाम् ॥

जिह्वाग्रमादाय करेण देवीं,

वामेन शत्रून् परिपीडयन्तीम् ।

गदाभिघातेन च दक्षिणेन,

पीताम्बराढ्यां द्विभुजां नमामि ॥

त्रिशूलधारिणीमम्बां, सर्वसौभाग्यदायिनीम् ।

सर्वशृङ्गारवेषाढ्यां, देवीं ध्यात्वा प्रपूजयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीतवस्त्रां त्रिनेत्रां च, द्विभुजां हाटकोज्ज्वलाम् ।
शिलापर्वतहस्तां च. संस्मरेत्सर्वसौख्यदाम् ॥
रिपुजिह्वाग्रहां देवीं, पीतपुष्पविभूषिताम् ।
वैरिनिर्दलनार्थाय, स्मरेत्तां बगलामुखीम् ॥
गम्भीरां च मदोन्मत्तां, स्वर्णकान्तिसमप्रभाम् ।
चर्तुभुजां त्रिनयनां, कमलासनसंस्थिताम् ।।
मुद्गरं दक्षिणे पाशं, बामे जिह्वां च वज्रकम् ।
पीताम्बरधरां सान्द्रदृढपीनपयोधराम् ॥
हेमकुण्डलभूषां च, पीतचन्द्रार्धशेखराम् ।
पीतभूषणपीतांगीं, स्वर्णसिंहासने स्थिताम् ॥
एवं ध्यात्वा जपेत् स्त्रोत्रमेकाग्रकृतमानसः ।
सर्वसिद्धिमवाप्नोति, मन्त्रध्यानपुरःसरम् ॥
आराध्ये जगदम्ब दिव्यकविभिः
सामाजिकैः स्तोतृभिः ।
माल्यैश्चन्दनकुंकुमैः, परिमलैरभ्यर्चिते
सादरात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यङ्न्यासिसमस्तभूतनिवहे,

सौभाग्यशोभाप्रदे ।

श्रीमुग्धे बगले प्रसीद विमले,

दुःखापहे पाहि माम् ॥

आनन्दकारिणी देवी, रिपुस्तम्भनकारिणी ।

मदनोन्मादिनी चैव, प्रीतिस्तम्भनकारिणी ॥

महाविद्या महामाया, साधकस्य फलप्रदा ।

यस्याः स्मरणमात्रेण, त्रैलोक्यं

स्तम्भयेत् क्षणात् ॥

वामे पाशांकुशौ जिह्वां,

तस्याधस्तात् वरं शुभम् ।

दक्षिणे क्रमतो वज्रं, गदाशक्त्यभयानि च ॥

विभ्रतीं संस्मरेन्नित्यां, पीतमाल्यानुलेपनाम् ।

पीताम्बरधरां देवीं, ब्रह्मादिसुरवन्दिताम् ॥

केयूरांगदकुण्डलभूषां,

बालार्कद्युतिरञ्जितवेषाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरुणादित्यसमानप्रतिमां,
कौशेयांशुकबद्धनितम्बाम् ॥
कल्पद्रुमतळनिहितशिलायां,
प्रमुदितचित्तोल्लसदलकान्ताम् ।
पञ्चप्रेतनिकेतनबद्धां,
भक्तजनेभ्यो वितरणशीलाम् ॥
एवं विधां तां बगलां, ध्यात्वा मनसि साधकः ।
सर्वसम्पत्समृद्ध्यर्थं, स्तोत्रमेतदुदीरयेत् ॥
चलत्कनककुण्डलोल्लसितचारुगण्डस्थलां,
लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम् ।
गदाहतबिपक्षकां कलितलोलजिह्वां चलां,
स्मरामि बगलामुखीं बिमुखवाङ्मुखस्तम्भिनीम्
पीयूषोदधिमध्यचारुबिलसद्रत्नोज्ज्वले मण्डपे,
तत्सिंहासनमूलपातितरिपुं,
प्रेतासनाध्यासिनीम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्णाभां करपीडितारिरसनां
भ्राम्यद्गदाविभ्रमां,
यस्त्वां ध्यायति यान्ति तस्य
विलयं सद्योऽथ सर्वापदः ॥
देवि त्वच्चरणाम्बुजार्चनकृते
यः पीतपुष्पाञ्जलिं,
मुद्रां बामकरे निधाय च
पुनर्मन्त्री मनोज्ञाक्षरम् ।
पीतध्यानपरोऽथ कुम्भकवशाद्
बीजं स्मरेत् पार्थिव-
स्तस्यामित्रमुखस्य वाचि हृदये
जाड्यं भवेत् तत्क्षणात् ॥
मन्त्रस्तावदलं विपक्षदलने
स्तोत्रं पवित्रं च ते,
यन्त्रं वादिनियन्त्रणे त्रिजगतां
जैत्रं न चित्रं हि तत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातः श्रीबगलेति नाम ललितं
यस्यास्ति जन्तोर्मुखे,
त्वन्नामस्मरणेन संसदि मुखस्तम्भो
भवेद् वादिनाम् ॥
वादी मूकति रङ्कति
क्षितिपतिर्वैश्वानरः शीतति,
क्रोधी शाम्यति दुर्जनः सुजनति
क्षिप्रानुगः खञ्जति ।
गर्वी खर्वति सर्वविच्च जडति
त्वद्यन्त्रणायन्त्रितः,
श्री नित्ये बगलामुखि प्रतिदिनं
कल्याणि तुभ्यं नमः ॥
दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं,
भूभृत्संनमनं चलन्मृगदृशां चेतः समाकर्षणम्
सौभाग्यैकनिकेतनं समदृशोः कारुण्यपूर्णेक्षणे,
शत्रोर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातर्भञ्जय मद्विपक्षवदनं

जिह्वां च संकीलय,

ब्राह्मीं यन्त्रय मुद्रयाशु धिषणामुग्रां

गतिं स्तम्भय ।

शत्रूंश्चूर्णय चूर्णयाशु गदया

गौराङ्गि पीताम्बरे,

विघ्नौघं बगले हर प्रणमतां

कारुण्यपूर्णेक्षणे ॥

मातर्भैरवि भद्रकालि विजये,

बाराहि विश्वाश्रये,

श्रीविद्ये समये महेशि बगले,

कामेशि बामे रमे ॥

मातंगि त्रिपुरे परात्परतरे

स्वर्गापवर्गप्रदे,

दासोऽहं शरणागतोऽस्मि कृपया

विश्वेश्वरि त्राहि माम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं विद्या परमा त्रिलोकजननी,
विघ्नौघविध्वंसिनी ।
कोषाकर्षण कारिणी
त्रिजगतामानन्दसंवर्द्धिनी ।
दुष्टोच्चाटनकारिणी पशुमनः-
सम्मोहसंदायिनी,
जिह्वाः कीलय वैरिणां विजयसे
ब्रह्मास्त्रविद्या परा ॥
मातर्यस्तु मनोरमं स्तवमिमं देव्याः
पठेत् सादरं,
धृत्वा यन्त्रमिदं तथैव समरे
बाह्वोः करे वा गले,
राजानो वरयोषितोऽथ करिणः
सर्पा मृगेन्द्राः खला—
स्ते वै यान्ति विमोहिता रिपुगणा
लक्ष्मीः स्थिरा सर्वदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुदिनमभिरामं साधको यस्त्रिकालं,
पठति स भुवनेस्मिन् पूज्यते देववर्गैः ।
सकलममलकृत्यं तत्त्वद्रष्टा च लोके,
भवति परमसिद्धा लोकमाता पराम्बा ॥
पीतवस्त्रवसनामरिदेहप्रेत-
जासननिवेशितदेहां,
फुल्लपुष्परविलोचनरम्यां
दैत्यजालदहनोज्ज्वलभूषाम् ॥
पर्यङ्कोपरि लसद् द्विभुजां तां,
कम्बुहेमनतकुण्डललोलाम् ।
वैरिनिर्दलनकारणरोषां, चिन्तयामि
बगलां हृदयाब्जे ॥
चिन्तयामि सुभुजां श्रृणिहस्तां
सद्भुजां सुरबन्दिचरणां ।
षष्ठिसप्ततिशतैर्धृतशस्त्रैर्बाहुभिः
परिवृतां बगलाम्बाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चौराणां संकटे च प्रहरणसमये
बन्धने वारिमध्ये.

वह्नौ वादे विवादे प्रकुपितनृपतौ
दिव्यकाले निशायाम् ।

वश्ये वा स्तभने वा रिपुवधसमये
प्राणबाधे रणे वा,

गच्छँस्तिष्ठँस्त्रिकाले यदि पठति
शिवं प्राप्नुयादाशु धीरः ॥

विद्या लक्ष्मीः सर्वसौभाग्यमायुः
पुत्रान्सम्पद्राज्यमिष्टं च सिद्धिः॥

मातः श्रेयः सर्ववश्यत्वसिद्धिः प्राप्तं
सर्वं भूतले त्वत्परेण ॥

गेहन्नाकति गर्वितः प्रणमति
स्त्रीसंगमी मोक्षति,

द्वेषी मित्रति पातकी सुकृतति
क्ष्मावल्लभो दासति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्युर्वैद्यति दूषणं गुणति वै
त्वत्पादसंसेवनात्,
तां वन्दे भवभीतिभञ्जनकरीं
गौरीं गिरीशप्रियाम् ॥

यत्कृतं जपसन्ध्यानं चिन्तनं परमेश्वरि ।
शत्रूणां स्तम्भनार्थाय तद्गृहाण नमोऽस्तु ते ॥
ब्रह्मास्त्रमेतद् विख्यातं त्रिषु लोकेषु दुर्लभम् ।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥
पीताम्बरां च द्विभुजां त्रिनेत्रां गात्रकोज्ज्वलाम्
शिलामुद्गरहस्तां च स्मरेत्तां बगलामुखीम् ॥
सिद्धिं साध्येऽवगन्तुं गुरुवर-
वचनेष्वार्हविश्वासभाजां,
स्वान्तः पद्मासनस्थां वररुचिबगलां
ध्यायतां तारताराम् ।

गायत्रीपूतवाचां हरिहरमनने
तत्पराणां नराणां,
प्रातर्मध्याह्नकाले स्तवपठनमिदं
कार्यसिद्धिप्रदं स्यात् ॥

॥ इति श्रीब्रह्मास्त्रमहाविद्यास्तोत्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"अथ हृदयम्"

ॐ अस्य श्रीबगलामुखी हृदयस्य नारदऋृषिः अनुष्टुप्छन्दः श्रीबगलामुखी देवता ह्ल्रीं बीजम्, क्लीं शक्तिः ऐं कीलकम् श्रीबगलामुखीप्रसाद सिद्धयर्थे जपे विनियोगः।

अथ न्यासः॥ नारदऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, ॐ श्री बगलामुख्यै देवतायै नमो हृदये, ह्ल्रीं बीजाय नमो गुह्ये, क्लीं शक्तये नमः, पादयोः ऐं कीलकाय नमः सर्वाङ्गे॥ अथ कराङ्गन्यासौ॥ ॐ ह्ल्रीं अङ्गुष्ठाभ्यां नमः, ओं क्लीं तर्जनीभ्यां नमः, ओं ऐं मध्यमाभ्यां नमः, ओं ह्ल्रीं अनामिकाभ्यां नमः, ओं क्लीं कनिष्टकाभ्यां नमः, ओं ऐं करतलकरपृष्ठाभ्यां नमः॥ ओं ह्ल्रीं हृदयाय नमः, ओं क्लीं शिरसे स्वाहा, ओं ऐं शिखायै वषट्, ओं ह्ल्रीं कवचाय हुम्, ओं क्लीं नेत्रत्रयाय वौषट्, ओं ऐं अस्त्राय फट्॥ ओं ह्ल्रीं क्लीं ऐं इति दिग्बन्धः॥

पीताम्बरां पीतमाल्यां पीताभरणभूषिताम्॥
पीतकञ्जपदद्वन्द्वां बगलां चिन्तयेऽनिशम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति ध्यात्वा संपूज्य—

पीतशङ्खगदाहस्ते पीतचन्दनचर्चिते ।
बगले मे वरं देहि शत्रुसङ्घविदारिणि ॥

इति संप्रार्थ्य—

ओं ह्लीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै स्वाहा ॥ इति मन्त्रं जपित्वा पुनः पूर्ववद् हृदयादिषडङ्गन्यासं कृत्वा स्तोत्रं पठेत् । तद् यथा—

वन्देऽहं बगलां देवीं पीतभूषणभूषिताम् ।
तेजोरूपमयीं देवीं पीततेजःस्वरूपिणीम् ॥
गदाभ्रमणा भिन्नां भ्रुकुटी भीषणाननाम् ।
भीषयन्तीं भीमशत्रून् भजे भक्तस्य भव्यदाम् ॥
पूर्णचन्द्रसमानास्यां पीतगन्धानुलेपनाम् ।
पीताम्बरपरीधानां पवित्रामाश्रयाम्यम् ॥२॥
पालयन्तीमनुपलं प्रसमीक्ष्यावनीतले ।
पीताचाररतां भक्तां तां भवानीं भजाम्यहम् ॥
पीतपद्मपदद्वन्द्वां चम्पकारण्यरोपिणीम् ।
पीतावतंसां परमां वन्दे पद्मजवन्दिताम् ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लसच्चारुसिञ्चत्सुमञ्जीरपादाम् ।
चलत्स्वर्णकर्णावतंसाञ्चितास्याम् ॥
बलत्पीतचन्द्राननांचन्द्रवन्द्यां ।
भजे पङ्कजादीड्यसत्पादपद्माम् ॥६॥
सुपीताभया मालया पूतमन्त्रं ।
परन्ते जपन्तो जयं संलभन्ते ॥
रणे रागरोषाप्लुतानां रिपूणां ।
विवादे बलाद्वैरिकृद्धातमातः ॥
स्फुरत्पीतभास्वत्प्रभाहस्कराभां ।
गदागञ्जितामित्रगर्वां गरिष्ठाम् ॥
गरीयोगुणागारगात्रां गुणाढ्यां ।
गणेशादिगम्यां श्रये निर्गुणाढ्याम् ॥८॥
जना ये जपन्त्युग्रवीजं जगत्सु ।
परं प्रत्यहं ते स्मरन्तः स्वरूपम् ॥
भवेद्वादिनां वाङ्मुखस्तम्भ आद्ये ।
जयो जायते जल्पतामाशु तेषाम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव ध्याननिष्ठाप्रतिष्ठात्मप्रज्ञा-
वतां पादपद्मार्थने प्रेमयुक्ताः ॥
प्रसन्ना नृपाः प्राकृताः पण्डिताः वा
पुराणादिगा दासतुल्या भवन्ति ॥१०॥

नमामस्ते मातः कनककमनीयाङ्घ्रिजलजं
वलद्विद्युद्वर्णं घनतिमिरविध्वंसकरणम् ॥
भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणम् ।
प्रपन्नानां मातर्जगति बगले दुःखदमनम् ॥११

ज्वलज्ज्योत्स्ना रत्नाकर मणि विषक्ताङ्क्य भव नं
स्मरामस्ते धाम स्मरहर हरीन्द्रेन्दुप्रमुखैः ॥
अहोरात्रं प्रातः प्रणयनवनीयं सुविशदं
वरं पीताकारं परिचितमणिद्वीपवसनम् ॥

पदामस्ते मातः श्रुतिसुखकरं नाम ललितं ।
लसन्मात्रावर्णं जगति बगलेति प्रचरितम् ॥
चलन्तस्तिष्ठन्तो वयमुपविशन्तोऽपि शयने ।
लभामो यच्छ्रेयो दिवि दुरवलभ्यं दिविषदाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु ।
यथा ते प्रासन्न्यं प्रतिपलमपेक्ष्य प्रणमताम् ।
अनल्पन्तन्मातर्भवति भृतभक्त्या भवतु नो ।
दिशातः सद्भक्तिं भुवि भगवतां भूरिभवदाम् ॥
मम सकल रिपूणां वाङ्मुखे स्तम्भयाशु ।
भगवति रिपुजिह्वां कीलय प्रस्थतुल्याम् ॥
व्यवसितखलबुद्धिं नाशयाशुप्रगल्भां ।
मम कुरु बहुकार्यं सत्कृपेऽम्ब प्रसीद ॥१५॥
व्रजतु मम रिपूणां सद्मनि प्रेतसंस्था ।
करधृतगदया तान् घातयित्वाशु रोषात् ॥
सधनवसनधान्यं सद्म तेषां प्रदह्य ।
पुनरपि बगला स्वस्थानमायातु शीघ्रम् ॥१६
करधृत रिपुजिह्वापीडनव्यग्रहस्तां ।
पुनरपि गदया तांस्ताडयन्तीं सुतन्त्राम् ॥
प्रणतसुरगणानां पालिकां पीतवस्त्रां ।
बहुबलबगलां तां पीतवस्त्रां नमामः ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयवचनकायैः कुर्वतां भक्तिपुञ्जं ।
प्रकटित करुणार्द्रा प्रीणती जल्पतीति ॥
धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः ।
सकलमपि किमेभ्यो देयमेवन्त्ववश्यम् ॥१८॥
तव चरणसरोजं सर्वदा सेव्यमानं ।
द्रुहिणहरिहराद्यै र्देववृन्दैः शरण्यम् ॥
मृदुमपि शरणं ते शर्मदं सूरिसेव्यम् ।
वयमिह करवामो मातरेतद्विधेयम् ॥१९॥
बगलाहृदयं स्तोत्रमिदं भक्तिसमन्वितः ।
पठेद्यो बगला तस्य प्रसन्ना पाठ तो भवेत् ॥
पीतध्यानपरो भक्तो यः शृणोत्यविकल्पतः ।
निष्कल्मषो भवेन्मर्त्यो मृतो मोक्षमवाप्नुयात्
आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम्
यस्त्विदं पठ ते प्रेम्णा बगला प्रीति मेतिसः ॥
देव्यालये पठन्मर्त्यो बगलां ध्यायतीश्वरीम् ।
पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीताचाररतो नित्यं पीतभूषां विचिन्तयन् ।
बगलां यः पठेन् नित्यं हृदयस्तोत्रमुत्तमम् ।
न किञ्चिद् दुर्लभं तस्य दृश्यते जगतीतले ॥
शत्रवो हानिमायान्ति तस्य दर्शनमात्रतः ॥
॥ इति सिद्धेश्वरतन्त्र उत्तरखण्डे बगलापटले
बगलाहृदयस्तोत्रं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"शतनाम"

नारद उवाच—

भगवन् देवदेवेश सृष्टिस्थितिलयात्मक ।

शतमष्टोत्तरं नाम बगलाया वदाधुना ॥१

श्रीभगवानुवाच ॥

शृणु वत्स प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ।

पीताम्बर्या महादेव्याः स्तोत्रं पापप्रणाशनम्

यस्य प्रपठनात्सद्यो वादी मूको भवेत्क्षणात् ॥

रिपूणां स्तम्भनं याति सत्यं सत्यं वदाम्यम् ॥

ॐ अस्य श्रीपीताम्बर्यष्टोत्तरशतनामस्तोत्रस्य श्रीसदाशिव ऋषिरनुष्टुप्छन्दः श्री पीताम्बरी देवता श्रीपीताम्बरीप्रीतये जपे विनियोगः ॥

ओं बगला विष्णुवनिता विष्णुशङ्करभामिनी

बहुला वेदमाता च महाविष्णुप्रसूरपि ॥

महामत्स्या महाकूर्मा महावाराहरूपिणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरसिंहप्रिया रम्या वामना बटुरूपिणी ॥
जामदग्न्यस्वरूपा च रामा रामप्रपूजिता ।
कृष्णा कपर्दिनी कृत्या कलहा कलकारिणी ॥
बुद्धिरूपा बुद्धभार्या बौद्धपाखण्डखण्डिनी ॥
कल्किरूपा कलिहरा कलिदुर्गार्तिनाशिनी ॥
कोटिसूर्यप्रतीकाशा कोटिकन्दर्पमोहिनी
केवला कठिना काली कलाकैवल्यदायिनी ॥
केशवी केशवाराध्या किशोरी केशवस्तुता ।
रुद्ररूपा रुद्रमूर्ती रुद्राणी रुद्रदेवता ॥
नक्षत्ररूपा नक्षत्रा नक्षत्रेशप्रपूजिता ।
नक्षत्रेशप्रिया नित्या नक्षत्रपतिवन्दिता ॥
नागिनी नागजननी नागराजप्रवन्दिता ।
नागेश्वरी नागकन्या नागरी च नगात्मजा ॥
नगाधिराजतनया नगराजप्रपूजिता ।
नवीना नीरदा पीता श्यामा सौन्दर्यकारिणी
रक्ता नीला घना शुभ्रा श्वेतसौभाग्यदायिनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुन्दरी सौभगा सौम्या स्वर्णभा स्वर्गतिप्रिया
रिपुत्रासकरी रेखा शत्रुसंहारकारिणी ।
भामिनी च तथा माया स्तम्भिनी मोहिनी शुभा
रागद्वेषकरी रात्री रौरवध्वंसकारिणी ।
यक्षिणी सिद्धिनिवहा सिद्धेशा सिद्धिरूपिणी
लङ्कापतिध्वंसकरी लङ्केशरिपुवन्दिता ।
लङ्कानाथकुलहरा महारावणहारिणी ॥
देवदानवसिद्धौघपूजिता परमेश्वरी ।
परमाणुरूपा परमा परतन्त्रविनाशिनी ॥
वरदा वरदाराध्या वरदानपरायणा ।
वरदेशप्रिया वीरा वीरभूषणभूषिता ॥
वसुदा बहुदा वाणी ब्रह्मरूपा बरानना ।
बलदा पीतवसना पीतभूषणभूषिता ॥
पीतपुष्पप्रिया पीतहारा पीतस्वरूपिणी ।
इति ते कथितं विप्र नाम्नामष्टोत्तरं शतम् ॥
यः पठेत् पाठयेद्वापि शृणुयाद्वा समाहितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य शत्रुः क्षयं सद्यो याति नैवात्र संशयः ॥

प्रभातकाले प्रयतो मनुष्यः
पठेत्तु भक्त्या परिचिन्त्य पीताम् ॥
द्रुतं भवेत्तस्य समस्तवृद्धि
र्विनाशमायाति च तस्य शत्रुः ॥

॥ इति विष्णुयामले नारदविष्णु संवादे श्रीबगलोष्टोत्तर शतनामस्त्रोत्रं सम्पूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"षोडशीसमर्चा"

ध्यानम्—

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशशरांश्चापं धारयन्तीं शिवां भजे ॥

मन्त्रः—ह्रीं क एइल ह्रीं हसकल ह्रीं सकल ह्रीं ॥

स्तोत्रम्—

कल्याणवृष्टिभिरिवामृतपूरिताभि-
र्लक्ष्मीः स्वयंवरणमंगलदीपिकाभिः ॥
सेवाभिरम्ब तव पादसरोजमूले ।
नाकारि किंमनसि भक्तिमतां जनानाम् ॥
एतावदेव जननि स्पृहणीयभास्ते,
त्वद्वन्दनेषु सलिलस्थसरोजनेत्रे ।
सान्निध्य मुद्यदरुणाम्बुजसोदरस्य,
त्वद्विग्रहस्य सुधया परयाप्लुतस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईषत्प्रभावकलुषाः कतिनाम सन्ति,
ब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः ।
एकः स एव जननि स्थिरबुद्धिरास्ते,
यः पादयोस्तब सकृत् प्रणतिं करोति ॥
लब्ध्वा सकृत्त्रिपुरसुन्दरि तावकीनं
कारुण्यकंदलितकान्तिभरं कटाक्षम् ।
कन्दर्पभावसुभगास्त्वयि भक्तिभाजः
संमोहयन्ति तरुणीं भुवनत्रयेऽपि ॥
ह्रींकारमेव तव नाम गृणन्ति ये वा
मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ।
त्वत्संस्मृतौ यमभटाभिभवं विहाय
दीव्यन्ति नन्दनवने सह लोकपालैः ॥
हन्तुः पुरामधिगलत्परिपूर्णमानः
क्रूरः कथं न भविता गरलस्यवेगः ।
नाश्वसनाय यदि मातरिदं तवार्द्ध-
देहस्य शश्वदमृताप्लुतशीतलस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वज्ञतां सदसि वाक्पटुतां प्रसूते
देवि त्वदङ्घ्रिसरसीरुहयोः प्रणामः ।
किञ्च स्फुरन्मुकुटमुज्ज्वलमातपत्रं
द्वे चामरे च महती बसुधां दधाति ॥

कल्पद्रुमैरभिमतप्रतिपादमेषु
कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः ।
आलोकय त्रिपुरसुन्दरि मामनाथं
त्वय्येव भक्तिभरितं त्वयि बद्धदृष्टिम् ॥

हन्तेतरेष्वपि निधाय मनांसि चान्ये
भक्तिं बहन्ति किल चापरदैवतेषु ।
त्वामेव देवि मनसाहमनुस्मरामि
त्वामेव नौमि शरणं जननि त्वमेव ॥

लक्षेषु सत्स्वपि तवाक्षिविलोकनाना
मालोकय त्रिपुरसुन्दरि मां कथंचित् ॥
नूनं मया च सदृशं करुणैकपात्रं
जातो जनिष्यति जनो नच जायते वा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां
किं नाम दुर्लभमिह त्रिपुराभिधाने ।
मालाकिरीटमदवारणमाननीयां-
स्तान्सेवते मधुमती स्वमेव लक्ष्मीः ॥
सम्पत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदानकुशलानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरितोद्धरणक्षमाणि
मामेव मातरनिशं कलयन्तु नान्यम् ॥
कल्पोपसंहरणकल्पितताण्डवस्य
देवस्य खण्डपरशोः परभैरवस्य ।
पाशाङ्कुशैक्षवशरासनपुष्पबाणा
सा साक्षिणी विजयते तव मूर्तिरेका ॥
लग्नं सदा भवतु मातरिदं त्वदीयं
तेजः परं बहुलकुङ्कुमपङ्कशोणम् ।
भास्वत्करीटममृतांशुकलावतंसं
रूपं त्रिकोणमुदितं परमामृतात्मम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रीकारत्रयसंपुटेन महता मन्त्रेण संदीपितं
स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवित्
तस्य क्षोणिभुजो भजन्ति
वशगा लक्ष्मीश्चिरंस्थायिनी
वाणी निर्मलसूक्तिभावभरिता
जागर्ति दीर्घं यशः ॥

॥ इति ब्रह्मविरचितं षोडशीकल्याणीस्तोत्रं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"बाराहीनिग्रहाष्टकम्"

देवि क्रोडमुखि त्वदङ्घ्रि-
कमलद्वन्द्वानुरक्तात्मने
मह्यं द्रुह्यति यो महेशि
मनसा कायेन वाचा नरः ।
तस्याशु त्वदयोग्रनिष्ठुरहला-
घातप्रभूतव्यथा-
पर्यस्यन्मनसो भवन्तु वपुषः
प्राणाः प्रयाणोन्मुखाः ।
देवि त्वत्पदपद्मभक्तिविभव-
प्रक्षीणदुष्कर्मणि
प्रादुर्भूतनृशंसभावमलिनां
वृत्तिं विधत्ते मयि ।
यो देही भुवने तदीयहृदया-
न्निर्गत्वरैर्लोहितैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सद्यः पूरयसे कराब्जचषकं
बाञ्छाफलैर्मामपि ॥
चण्डोत्तुण्डविदीर्ण दुष्टहृदय-
प्रोद्भिन्नरक्तच्छटा-
हालापानमदाट्टहासनिनदा
टोपप्रतापोत्कटम् ।
मातर्मत्परिपन्थिनामपहृतैः
प्राणैस्त्वदङ्घ्रि द्वयं
ध्यानोड्डामरवैभवोदयवशात्
सन्तर्पयामि क्षणात् ॥
श्यामां तामरसाननाङ्घ्रिनयनां
सोमार्द्धचूडां जगत्-
त्राणव्यग्रहलायुधाग्रमुसलां
संत्रासमुद्रावतीम् ।
ये त्वां रक्तकपालिनीं हराबरा-
रोहे वरहामानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावः सद्धते कथं क्षणमपि
प्राणन्ति तेषां द्विषः ॥
विश्वाधीश्वरवल्लभे विजयते
या त्वं नियन्त्रात्मिका ।
भूतान्ता पुरुषायुषाधिककरी
पाकप्रदा कर्मणाम् ॥
त्वां याचे भवतीं किमप्य वितथं
को मद्विरोधी जन-
स्तस्यायुर्मम वाञ्छितावधि
भवेन्मातस्तवैवाज्ञया ॥
मातः सम्यगुपासितुं जडमतिस्त्वां
नैव शक्नोम्यहम् ।
यद्यप्यन्वितदेशिकाङ्घ्रिकमला-
नुक्रोशपात्रस्य मे ।
जन्तुः कश्चन चिन्तयत्यकुशलं
यस्तस्य तद्वैशसम् ।
भूयाद्दैव विरोधिनो मम च ते
श्रेयः पदासंगिनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाराहि व्यथमानमानसगल
त्सौख्यं तदाशाबलिं
सीदन्तं यमपाकृताध्यवसितं
प्राप्ताखिलोत्पादिकम् ॥
क्रन्दन् बन्धुजनैः कलङ्कितकुलं
कण्ठव्रणोद्यत्कृमिं ।
पश्यामि प्रतिपक्षमाशु पतितं
भ्रान्तं लुटन्तं मुहुः ॥
वाराहि त्वमशेष जन्तुषु पुनः
प्राणात्मिका स्पन्दसे
शक्तिव्याप्तचराचरा खलु
यतस्त्वामेव संप्रार्थये
त्वत्पादाम्बुज संगिनो मम
सकृत् पापं चिकीर्षन्ति ये
तेषां मा कुरु शङ्करप्रियतमे
देहान्तरावस्थितिम् ॥

॥ इति बाराहीं निग्रहाष्टकं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सप्तश्लोकी दुर्गा

शिव उवाच—

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनी।
कलौ हि कार्यसिद्ध्यर्थं सुपात्रं ब्रूहि यत्नतः॥

देव्युवाच—

शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम्।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते॥

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः दुर्गाप्रीत्यर्थं सप्तश्लोकी—दुर्गापाठे विनियोगः।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा।
बलादाकृष्य मोहाय महामाया प्रयच्छति॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दारिद्र्यदुःखभयहारिणि का त्वदन्या ।
सर्वोपकारकरणाय सदार्द्रचित्ता ॥२॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥
रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ॥
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥७॥

॥ इति श्रीसप्तश्लोकी दुर्गा सम्पूर्ण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"अथ दुर्गाद्वात्रिंशन्नाममाला"

दुर्गा दुर्गार्तिशमनी दुर्गापद्विनिवारिणी ।
दुर्गमच्छेदिनी दुर्गसाधिनी दुर्गनाशिनी ॥
दुर्गतोद्धारिणी दुर्गनिहन्त्री दुर्गमापहा ।
दुर्गमज्ञानदा दुर्ग-दैत्यलोक दवानला ॥
दुर्गमा दुर्गमालोका दुर्गमात्मस्वरूपिणी ।
दुर्गमार्गप्रदा दुर्गमविद्या दुर्गमाश्रिता ॥
दुर्गमज्ञानसंस्थाना दुर्गमध्यानभासिणी ।
दुर्गमोहा दुर्गमगा दुर्गमार्थस्वरूपिणी ॥
दुर्गमासुरसंहन्त्री दुर्गमायुधधारिणी ।
दुर्गमाङ्गी दुर्गमता दुर्गम्या दुर्गमेश्वरी ॥
दुर्गभीमा दुर्गभामा दुर्गभा दुर्गहारिणी ।
नामावलिमिमां यस्तु दुर्गाया मम मानवः ॥
पठेत् सर्वभयान्मुक्तो भविष्यति न संशयः ॥

॥ ॐ श्रीदुर्गायै नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu